A.C. Joshi Library
P.U. Chandigarh

MSS No. 201 Subject Literature

Name of MSS मेघदूत टीका

Author Mallinātha

Period – – Folios 56

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios 41, 44, 50

201 मेघदूत काव्य सटीक

20 47

ॐ स्वस्ति श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय नमः ॥ ॐ मातापितृभ्यां जगतो नमो वामार्ध
जानये । सद्यो दक्षिणदृक्पातसंकुचद्वामदृष्टये ॥१॥ अंतरायतिमिरोपशांतये शांतपावनमचिंत्यवैभवं
तं नरं वपुषि कुंजरं मुखे मन्महे किमपि तुंदिलं महः ॥२॥ शरणं करवाणि शर्मदं ते चरणं वाणि चरा
चरोपजीव्यं । करुणामसृणैः कटाक्षपातैः कुरु मामंब कृतार्थसार्थवाहं ॥३॥ इहान्वयमुखेनैव सर्वं व्या
ख्यायते मया । नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ॥४॥ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मु

ॐ कश्चित्कांताविरहगुरुणा स्वाधिकारप्रमत्तः शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ॥

नमा खमिति शास्त्रात्काव्यादौ वस्तुनिर्देशान्कथामस्तौति ॥५॥ कश्चिदिति ॥ स्वाधिकारात्स्वनियोगात्प्रमत्तो
ऽनवहितः प्रमादो ऽनवधानता इत्यमरः । जुगुप्साविरामप्रमादार्थानामुपसंख्यानमित्यपादानत्वात्पं
चमी । अत एवापराधात् । कांताविरहेण गुरुणा दुर्भरेणास्वर्थः । गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे
इति शब्दार्णवे । वर्षं संवत्सरं भोग्येन कालाध्वनोरत्यंतसंयोग इति द्वितीया । अत्यंतसंयोगे च इति समासः ।
कृत्यचेति णत्वं । भर्तुः स्वामिनः शापेन अस्तं नाशं गमितो महिमा सामर्थ्यं यस्य सो ऽस्तंगमितमहिमा । अ
स्तमिति मकारांतमव्ययं । तस्य द्वितीयेति योगविभागात्समासः । कश्चिद्यक्षो देवयोनिविशेषः । विश्रा

मे.टी. १

धरोप्सरो यक्षरक्षोगंधर्वकिन्नराः पिशाचो गुह्यकः सिद्धो भूतो मी देवयोनय इत्यमरः जनकतनया
या सीता तस्याः स्नानैरवगाहनैः पुण्यानि पवित्राणि उदकानि येषु पावनेष्वित्यर्थः छायाप्रधाना
स्तरवः छायातरवः शाकपार्थिवादित्वात्समासः स्निग्धाः सान्द्राः छायातरवो नमेरुवृक्षा येषु तेषु
वसतियोग्येष्वित्यर्थः स्निग्धं तु मसृणे सान्द्रे छायाह्वो नमेरुः स्यादिति च शाश्वतः रामगिरे

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धछायातरुषु वसतिं रामगिर्याश्रमेषु ॥१॥

श्चित्रकूटस्याश्रमेषु वसतिं स्थितिं वहिवसतिभ्यश्चेत्यौणादिकोतिप्रत्ययः चक्रे कृतवान् अत्र काव्ये त
त्रतत्र नगरार्णवादिवर्णनसंभवान्महाकाव्यत्वं रसो विप्रलम्भशृंगारः अत्राप्युक्तादावस्याश्रमए व
एकत्रानवस्थानेनोक्तं विततमाश्रमेष्विति बहुवचनेन सीतानाथसतिरामस्पृहेनुमत्वंदेशो मनस्विनि धायमेवसे
वेशकविः कृतवानित्याशयेनाह अत्र काव्ये सर्वत्र मंदाक्रान्ता वृत्तं तल्लक्षणं मंदाक्रान्ता जलधिषडगैर्म्भौ न

मेघदूतटीका १

तस्मिन्निति॰ तस्मिन्नद्रौ विश्लेषादबलाविप्रयुक्तः कान्ताविरही कनकस्य वलयः कटकः कटको वलयोऽस्त्रिया
मित्यमरः तस्य भ्रंशेन पातेन रिक्तः शून्यः प्रकोष्ठः कूर्परादधः प्रदेशो यस्य स तथोक्तः कक्षान्तरे प्रकोष्ठः स्यात्प्र
कोष्ठः कूर्परादध इति शब्दार्णवे विरहदुःखात् क्षामाद् इत्यर्थः कामी कामुकः स यक्षः कतिचिन्मासानष्टौ मा
सानित्यर्थः मासान्मासान् गमय चतुर इति वक्ष्यमाणवचनात् नीत्वा यापयित्वा आषाढाभिनक्षत्रे॰

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी नीत्वा मासान्कनक
वलयभ्रंशरिक्तप्रकोष्ठः ॥

णयुक्ता पौर्णमासी आषाढी नक्षत्रेण युक्तः काल इत्यण्प्रत्ययः टिड्ढाणञित्यादिना ङीप् सास्मिन्पौ
र्णमासीत्याषाढो मासः सास्मिन्पौर्णमासीति संज्ञायामित्यण् तस्य प्रथमदिवसे आश्लिष्टसानुमा
क्रान्तकटकं वप्रक्रीडा उत्खातकेलयः उत्खातकेलिः शृङ्गाद्यैर्वप्रक्रीडा निगद्यते इति शब्दार्णवे तासु परि
णतस्तिर्यग्दन्तप्रहारः तिर्यग्दन्तप्रहारस्तु गजः परिणतो मत इति हलायुधः स चासौ गजश्च स इव प्रेक्षणीयो
दर्शनीयस्तं मेघं ददर्श गजप्रेक्षणीयमित्यनेन वशब्दलोपाल्लुप्तोपमा केचिदाषाढस्य प्रथमदिवस इत्यत्र प्रथमास

मे.दू.
टी.
२

नैनमसीति वक्ष्यमाणनभोमासप्रमासत्वेऽर्थे मू प्रमासस्तत्र प्रथमदिवस इति पाठं कल्पयंति तदसंगतं प्र
थमातिरेके कारणाभावात् नभोमासस्य प्रमासस्यार्थे सिद्धत्वमिति चेत् न प्रमासेति मात्रस्य मासप्र
मासस्यैव प्रथमदिवसस्यानुपपत्तेः अस्तं तप्रमासेन रूपयोगित्वाभावेन विवक्षितत्वात् विवक्षितत्वे वा
सप्तेपि प्रथमनमदिवसांतिनाणामेव दर्शनकल्पनायां प्रमाणाभावेन तदसंभवात् प्रस्तुतस्वपक्षेप
वरूपालंसंदेशस्य भाष्यनर्थप्रतीकारार्थस्य पुरत एवानुमानमुक्तं भवतीति उपयोगस्थितः न नन्वत

आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्रीडापरिणतगज
प्रेक्षणीयं ददर्श २

स्यनार्थविवेक इति चेत् न उन्मत्तस्य नानार्थप्रतीकारार्थप्रवृत्तिरपीति संदेश एव मा भूत् तथा
व काव्यारंभ एवाप्रसिद्धः स्यात् इत्यहो मल्लिनाथीपांडित्यप्रकर्षः कथं तर्हि शापांतो मे भु
जगशयनादुत्थिते शार्ङ्गपाणाविमादिना भगवत्प्रबोधावधिकस्य शापस्य मासचतुष्टयाव
तिष्ठस्योक्तिः दशाहदिवसाधिक इति चेत् स्वपत्नेपि कथं सा विंशतिदिवसेष्वनत्वादिति संतोष
व्यं तस्मादाषाढेषमस्यमविपतिततामितिस्तुतुक्तं प्रथमदिवस इति २ ॥ रामः २

तस्येति नाम्नानोयत्ता: नाम्ना अभीष्टरूपेच चन्द्रे यत्तेत्तत्रियमाक्रयोरितिविश्वः राज्ञो राज्ञा राजः कुबेरः रा
जराजोधनाधिपः त्वमरः नाजहः सखिभ्यष्टजितिटच् समासः तस्यानुचरोपदः अन्तर्बाष्पः धीरोदात्त
त्वात्तिनाश्रुः सत्कौतुकाधानहेतुरभिलाषोत्पत्तिकारणस्यकौतुकंचाभिलाषेस्यादुत्सवेनर्महर्षयो
रितिविश्वः तस्य मेघस्यपुरः अग्रे कथमपि गरीयसा प्रयत्नेनेत्यर्थः ज्ञानहेतु विवलायामप्यादिकयमव्ययं
कथमादि तथाप्यं तेयत्न गौरवपादयोः रितिमत्वलः स्थित्वा कथंभूतस्यविरहदध्यौ चिन्तयामासध्यै चिन्ता

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो रंतर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ
मेघालोके भवति सुखिनोप्यन्यथावृत्तिचेतः कंठाश्लेषप्रणयिनिजने किं पुनर्दूरसंस्थे ३

याभिति लिङ् मनोविकारो यथाशमनपर्यन्तमित्यर्थः विकारहेतुमाह मेघेति तथाहि मेघालोके मेघ
दर्शने तिसुखिनोपि प्रियादिजनसंगतस्यापि चेतश्चित्तं अन्यथावृत्तिर्व्यापारो यस्य तदन्यथा
वृत्ति भवति विकृतिमापद्यत इत्यर्थः कंठाश्लेषप्रणयिनि कंठालिंगनार्थिनि जने दूरे संस्थाःस्थिति
र्यस्य तस्मिन् दूरसंस्थे सति किंपुनः विरहिनि किमुक्तव्यमित्यर्थः विरहिणां मेघसंदर्शनमुद्दीपन
मित्यर्थः अर्थान्तरन्यासोलंकारः तदुक्तं दंडिना ज्ञेयः सोर्थान्तरन्यासो वस्तु प्रस्तुत्य किंचनः तत्साधनसम

मे॰ टी॰ ३

अथ सामादिक्षेोतेः करणाः सन्निकृतवानित्यनयाह प्रत्यासन्न इति सपत्नः पश्चिरं दध्यौ सद्रस्यार्थः नभसि श्रावणे मासि
नभः स्याच्छ्रावणो नभा इत्यमरः प्रत्यासन्ने आषाढस्यानेनन्तरत्वात्सन्निकृष्टमाने सति सोमहृद्धिः दयिताजीवितालम्बनार्थी स
न्वर्णाकालस्य विरहदुःखजननकत्वात्तुमनसनपत्नीकारात्स्वयात्मतिपतिवेध प्रवृत्तश्च मितिस्याये नपागतप्रियायाणा
धारणोपायं चिकीर्षुरित्यर्थः जीवनस्य जलस्य प्रतः १ दवधो जीमूतेन स्वामीष्टोपदेशादिन्त्वास्साधुः तेन जीमूतेन
जलधरेण प्रयोज्येन स्वकुशलमयीं स्वक्षेमप्रधानां प्रवृत्तिं वार्त्तां वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः हारयिष्यन् प्रापयिष्य
न् लृटः शेषे चेति चकारान्त्रियार्थंक्रियोपपदाल्लृट् स्मसपः जीवनार्थं कर्मे जीवनमेदानेनैव कर्तव्यमितिभावः हृष्टो

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिं सः प्रत्यग्रैः कुटजकु
सुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ४ ॥ रम्यनरम्यामितिवत्कर्मसंज्ञायां

विकल्पात्समदेवकृते निरन्तीयाप्रत्यग्रैरभिनवैः कुटजकुसुमैः गिरिमल्लिकाभिः कुटजो गिरिमल्लिकेति
हलायुधः कल्पितार्घाय कल्पितोऽनुष्ठितोऽर्घः पूजाविधिर्यस्मै तस्मै अर्घः पूजाविधावित्यमरः तस्मै
जीमूताय क्रियाग्रहणमपि कर्तव्यमिति संप्रदानत्वाच्चतुर्थी प्रीतः प्रीतिप्रमुखवचनं प्रीतिः प्रेमवाकानि वचनानि
यस्मिन् कर्मणि तत्प्रीतिप्रमुखवचनं यथा तथा शोभनमागतं स्वागतं वचनं प्रीतः सन् व्याजहार कुशला
गमनं पप्रच्छेत्यर्थः नाथेनन्वत्र प्रत्यासन्ने नभसीति समाधानेन प्रत्यासन्ने मनसीति साधीयानषाढः क
ल्पितः प्रत्यासन्ने प्रकृति मापन्ने सतीत्यर्थः तदसत्पयस्तुनेनैव शैवपाठविरोधः प्रदर्शितः सासाममिप्राया ३

नन्वचेतनेन साध्यमर्थं कथमचेतनेन कारयितुं प्रवृत्तः इत्यपेक्षायां समाधत्ते धूमेति धूमश्च ज्यो
तिश्च सलिलं च मरुच्च वायुश्च तेषां सन्निपातः संघातो मेघः क्व अचेतनत्वात्संदेशानर्ह इत्यर्थः पटु
करणैः समर्थेन्द्रियैः करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि इत्यमरः प्राणिभिश्चेतनैः प्राणी तु चेतनो
जन्मी इत्यमरः प्रापणीयाः प्रापयितव्याः संदिश्यत इति संदेशालपवार्थाः क्व इत्येवमौत्सुक्यादिष्टा
र्थोद्युक्त उत्सुक इत्यमरः अपरिगणयन् अविचारयन् गुह्यको यक्षस्तं मेघं ययाचे याचितवान्

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रा
पणीयाः इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतने षु

गुह्यको यक्षस्तं मेघं ययाचे याचितवान् टुयाचृ याच्ञायां तथाहि कामार्ता मदनातुराः चेतनाः
श्चेतनाश्च तेषु विषये प्रकृतिकृपणाः स्वभावादीनाः कामान्धता युक्तविवेकशून्यत्वादचेत
नयाच्ञाम विरुध्यत इत्यर्थः अत्र मेघसंदेशयोर्विरूपयोर्घटनाद्विरूपघटनात्मको विषमालंकारः
तदुक्तं विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् विरूपघटना चासौ विषमालंकृतिर्द्विधा स
चार्थान्तरन्यासोऽन्यः प्रागुक्तस्य समर्थकत्वेनैव चतुर्थपादेन सोपन्यासात् ५ ॥

मे॰टी॰ ९

मेऽस्मिन्याच्ञाप्रकारमाह जातमिति हे मेघ त्वां भुवनेषु विदितेऽप्रसिद्धे भुवनविदिते निःशेषितभर्त्सनार्थे मतिवृद्धी
मादिना वर्तमानार्थत्वाभिमतस्य वंशे तेमानः इति भुवनशब्दस्य बहुत्वेन लानियमात्समासो न स्यात् केन वंश
मात्यामिति निषेधात् पुष्करावर्तकाः पुष्करावर्तकानाम् केचिन्मेघानां कुलस्याख्ये प्रावेशे जाते म
हाकुले प्रसूतमित्यर्थः कामरूपमिच्छाधीनविग्रहं इदं वीदिसे चारत्वमभिमतमित्यर्थः मघोनः इन्द्रस्य प्रकृतिपुरुषं
प्रधानपुरुषं जानामि तेन तत्त्वप्रभुत्वादिना नामिइत्यादिगुणयोगित्वेन हेतुना विधिवशाद्दैवायत्तत्वात् वि

जातं वंशे भुवनविदिते पुष्करावर्तकानां जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः तेनार्थित्वं त्वयि
विधिवशाद्दूरबन्धुर्गतोऽहं याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ६ विधिवशाद्धातृनियोगेन दैवेनेत्यर्थः दूरबन्धुः

प्राप्ते वशमिच्छाप्रभेदयोरिति विश्वः दूरे बन्धवः यस्य स दूरबन्धुः विप्रकृष्टभार्यो इत्यर्थः अहं त्वयि प्रार्थितेन याच
कत्वेन गतः याचकस्य याच्ञा गुणोत्कर्षे उक्तोपपद्यते प्रायशः कार्ये दैवाधीनत्वाभिमतिमिति लाघवदोषाभा
वोपयोगमित्याह याच्ञेति न यादिह्य अधिगुणो अधिकगुणे पुंसि विषये याच्ञा मोघा विफलापि वर
मीषन्न प्रियं दातुं गुणाद्यज्ञात्प्रियत्वे याच्ञा वैफल्याद्दोषोन्नयनत्वमितिनिभावः अधमे निर्गुणे याच्ञा
लब्धकामापि सफलापि न वरं इष्टमप्रियमपि न भवतीत्यर्थः देवादृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक्प्रि
यमित्यमरः अधीनरत्नमानुप्राप्तां प्रयोजकारः नेउन्नदेरिनामपयः प्रियतरोऽस्मानमितिसेनदायेपाद

संतप्तानामिति हेपयोदजलंतत्वंसंतप्तानां आतपेनप्रवासविरहेणचसंज्वरितानांसंतापयुः १
संज्वरसमाविष्टमम शरणं आतपखिन्नानांपयोदानेनतोषितानांस्वस्थानप्रेरणयाचरक्षकोऽ
सिशरणमतःहरत्वत्तोहिममः तत्तस्मात्कारणात्धनपतेःकुबेरस्यक्रोधेनकोपेनविश्लेषितस्य
प्रिययावियोजितस्यमेममसंदेशंवार्तांप्रियायाःहरप्रियांप्रतिनयप्रार्थंःसंबंधसामान्येषष्ठीः

संतप्तानांत्वमसिशरणंतत्पयोदप्रियायाःसंदेशंमेहरधनपतिक्रोधविश्लेषितस्य गं
तव्यातेवसतिरलकानामयक्षेश्वराणां वाह्योद्यानस्थितहरशिरश्चंद्रिकाधौतहर्म्या ७

संदेशहरणेनावयोःसंगमायेननूनंदेशप्रार्थः कुत्रस्थानेसास्थितातत्स्थानस्यकिंव्यावर्तकंतत्राह गं
तव्येतिवहिर्भवंवाह्यंचतदुद्यानंचपवजनेभ्यस्त्रायतिवक्तव्यमितियक्षामत्यर्थः वाह्योद्याने
स्थितस्यहरस्यशिरसियाचंद्रिकातयाधौतानिनिर्मलानिहर्म्याणिधनिकभवनानियस्यां
सातथोक्ताहर्म्यादिधनिनांवासःइत्यमरः अनेनव्यावर्तकमुक्तं अलकानामालकेतिप्रसि
द्धापदेयक्षेश्वराणांवसतिर्वासस्थानंतेनत्वयागंतव्यंप्राप्तव्यमित्यर्थःकर्मणिकर्तरिवाषष्ठी ७

मे॰दू॰ टी॰ ५

मदर्थंप्रवृत्तस्यतेपथिकांगनाश्वसनमानुषंगिकंफलमाह त्वामितिपवनपदवीमाकाश-
मार्गंत्वांप्रयानेगच्छंतीतिपथिकाःपथःकन्निति कन्प्रत्ययः तेषांवनिताःप्रोषितभर्तृकाः
प्रत्ययात्प्रियागमनविश्वासात्प्रत्ययोधीनशपथज्ञानविश्वासहेतुष्वित्यमरः आश्वसं-
त्योविश्वसिताःप्राणान्धारयंत्यःश्वसिधातोःशत्रन्तादुगितश्चेतिङीप्नद्याउद्गृहीतालकान्ताःउ-

त्वामारूढंपवनपदवीमुद्गृहीतालकांताःप्रेक्षिष्यंतेप
थिकवनिताःप्रत्ययादाश्वसंत्यःकःसंनद्धेविरहविधुरां
त्वय्युपेक्षेतजायांनस्यादन्योप्यहमिवजनोयःपराधीनवृत्तिः ॥८॥

त्क्षिप्तालकाग्रमध्योद्धृतालकाग्राःसत्यःप्रेक्षिष्यंतेआसन्नदर्शनतयाद्रक्ष्यंतीत्यर्थः तथाहि
त्वयिसंनद्धेउद्युक्तेसतिविरहेणविधुरांविह्वलांजायांकउपेक्षेतनकोपीत्यर्थः अन्योपिम-
द्व्यतिरिक्तोपियोजनोऽहमिवपराधीनवृत्तिःपरायत्तजीविकोनस्यात्स्वतंत्रस्तुनकोप्युपे-
क्षेतेतिभावः इत्यर्थान्तरन्यासः निमित्तान्यपितेशुभानिदृश्यन्तइत्याह ८ रामः ५

मंदं मंदमिति अनुकूलपवनो वायुस्त्वां मंदं मंदं नुदति मंदं मित्यर्थः अनुकूलं चिह्नीसायामेवक्ष्यति निर्वोढा
प्रकारेण गुणवद्वसे मेत तदाश्चवेगात्मकमेधारयवज्ञावेन स्तोकमपल्लकिमंदंमंदमितिस्यात् तदेवाहत्वामनः म
दंमंदमिति सप्रकारार्थेहि भावहत्तियथासादृश्यभाविफलानुरूपमित्यर्थः यथासाहस्यपोगपत्वावीसाख्वत
तिक्रमइति पादयाः नुदति प्रेरयति अयं सगंधः सगर्वः संबंधी रिति गंधो गंधवत्ताम्मादेलेपे सेवधगर्वेयाहि
सभवापि विश्रु तेनवामो वामभागस्थवामस्त्ववक्रः रमे स्यात्सव्यवामागके पिवेति शब्दार्णवे चातकः पक्षि
विशेषस्तमधुरं श्राव्यं नदति व्याहरति इदं निमित्तद्वयवर्तेनवर्तिष्यते चापरं निमित्तमिमाह गर्भेतिगर्भः क्ष

मंदंमंदंनुदतिपवनश्चानुकूलोयथात्वां वामश्चायंनदतिमधुरंचातकस्तेसगंधः गर्भाधान
क्षणपरिचयान्नूनमाबद्धमालाः सेविष्यंतेनयनसुभगंखेभवंतंबलाकाः ९ ॥

नयनसुभग

त्तिस्थोजंतुः गर्भः पवनकोस्यरोमहते पवनसवंदवेक्षदोक्षत्तिस्यजेतस्रोति याद्वः तस्माद्दानमस्याद्वेत
देवताणउत्सवः स्वस्वदेहतत्वादिति भावः निस्थोपारस्थितोकालविशेषास्तवयोः तणइत्यमरः तस्मिन्
रिचयादभ्यासाद्धेतोः खेभ्यो विबद्धमालाः गर्भोत्सवत्वाद्येत्वत्समीपबद्धयेक्षयः इत्यर्थः उक्तंच क
र्णे दयगर्भं बलाकादधते भयोपाश्चाकेनिवद्धावलयः समंतादिति बलाकाः बकांगता नयनसुभ
गं दृष्टिप्रियं भवंतं नूनं मन्ये सेविष्यंते अनुकूलमारुतचातकशाब्दितबलाकादर्शनानां शुभसूचक
त्वेशाकुनग्रन्थेषु एतद्धि सरतयाप्रालेषिव ९ ॥

मे०टी०
६

नैवं वसानाशाद्धृतस्वल्लनाद्धानिरर्थकस्त्वत्प्रयास इत्याशङ्क्याह तां चेति हे मेघ दिवसानामवशिष्ट
दिनानां गणनायां संख्याने तत्परामासक्तां नूपुरैरसंस्मितामक्तां विरहरैः अत एवाव्यापन्नाममृ
तामाशापाशस्थाने मदागमनप्रत्याशया जीवन्तीमित्यर्थः एकः पतिर्यस्याः सा तां एकपत्नीं पति
व्रतामित्यर्थः नित्यं सपत्न्यादिष्विति ङीप् नकारश्चान्तादेशः भ्रातुर्मे जायां मा रक्षत्विति शोकदर्शनीयाभि

तां चावश्यं दिवसगणनातत्परामेकपत्नीमव्यापन्नामविहतगतिर्द्रक्ष्यसि (त्वं) भ्रातृजा
यां आशाबंधः कुसुमसदृशं प्रायशो ह्यंगनानां सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि १०
बाहुल्येन स्नेहयुक्त

मार्गाशयः तां मत्प्रियां अविहतगतिः सफलगतिः सन्नवश्यं द्रक्ष्यसि आलोकयिष्यसे तथाहि
आशाभित्तिरस्या आशापादिगन्तिरस्य योरिति पादवः बध्यतेनेनेति बंधो बंधनं हन्तमिति यावत्
आशैव बंधः आशाबंधः कर्त्ता प्रायशो बाहुल्येन युक्तं अत एव कुसुमसदृशं सुकुमारमित्यर्थः अत एव
विप्रयोगे विरहे सद्यः पाति सद्योभ्रंशनशीलमंगनानां हृदयं जीविते हृदयं जीविते चित्ते वक्षः ६
स्याकूतयोरिति शब्दार्णवे प्रायशः प्रायेण रुणद्धि प्रतिबध्नातीत्यर्थान्तरन्यासः १० रामः

संपत्तिं सहायसंपत्तिं आसीमाह कर्तुमिति गर्जितं कर्तृ महीमुच्छिलीध्रामुद्गतकंदलिकां कंदलो
च्छिलीध्रास्यादिति शब्दार्णवे अवंध्यां वंध्यां कर्तुं प्रभवति शक्नोति शिलीध्राणां भाविसस्यसंपत्ति
सूचकत्वादिति भावः तदुक्तं निमित्तनिदाने कालाभ्रयोगादुदिताः शिलीध्राः संपन्नसस्यां कथयंति धा
त्रीमिति तच्छ्रवणसुभगं श्रोत्रसुखं लोकस्येति शेषः ते तव गर्जितं श्रुत्वा मानसोत्काः मानसं सरस्तन्
मनसः उत्काः इति यावत् उत्क उन्मना इति निपातात्साधुः कालांतरे मानसस्य हिमदुष्टत्वादि

उत्पन्नहेतु · तव कर्णभजं गर्जितं

कर्तुं यच्च प्रभवति महीमुच्छिलीध्रामवंध्यां तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसो
त्काः आकैलासाद्बिसकिसलयच्छेदपाथेयवंतः संपत्स्यंते नभसि भवतो राजहंसाः सहायाः

पुनः कथंभूताः हंसाः

कोमलपत्राणि

मस्य च हंसानां रोगहेतुत्वादन्यत्र गता हंसाः पुनर्वर्षास्तु मानसमेव गच्छंतीति प्रसिद्धः बिसकि
सलयानां मृणालाग्राणां छेदैः शकलैः पाथेयवंतः पथि साधु पाथेयं पथ्यतिथिव
सतिस्वपतेर्ढञ् तद्वंतः मृणालशकलवंत इत्यर्थः राजहंसा हंसविशेषाः राजहंसास्तु ते चंचु
चरणैर्लोहितैः सिता इत्यमरः नभसि व्योम्नि भवतस्तव आ कैलासात् कैलासपर्यंतं पदद्वयं
चैतत् सहयाः सहयात्राः सहायाः सहायात्रः स्यादिति शब्दार्णवे संपत्स्यंते संभविष्यंति ११

मे॰ टी॰ ७

आपृच्छस्वेति प्रियं सखायं प्रियसखं वा राजहः सखिभ्यष्टजिति टच् समासांतः तुंगमुन्नतं पुंसां वं
द्यैः स्तुत्याराधनीयैः रघुपतिपदैः रामपदन्यासैः मेखलासु कटकेषु अथ मेखला श्रोणिस्थानेः
द्रिकंटके कुकरिबंधेः स्त्रिबंधन इति यादवः अंकितं चिह्नितं इत्थं सावित्वान्महत्वात्पवित्रत्वाच्च सं
भावनार्हं अमुं शैलं चित्रकूटाद्रिमालिंग्य आपृच्छस्व यास्यामीत्यामंत्रणेन सभाजयस्व

आपृच्छस्व प्रियसखममुं तुंगमालिंग्य शैलं वंद्यैः पुंसां रघुपतिपदैरंकितं मेखलासु
कालेकाले भवति भवतो यस्य संयोगमेत्य स्नेहव्यक्तिश्चिरविरहजं मुंचतो वाष्पमुष्णं
१२॥

आमंत्रणसभाजने आमंत्रणसभाजने आपृच्छनमित्यमरः आङि नुप्रच्छोरित्यात्मनेपदं स
विवं निर्वहति काले काले प्रतिप्रावृट्कालं स्नेहस्मागमनकालशब्देनोच्यते वीप्सा
यां द्विरुक्तिः भवतः संयोगं संपर्कं मेत्य चिरविरहजमुष्णं वाष्पं उष्माणं नेत्रजलं च वाष्पो ने
त्रजलोष्मणोरिति विश्वः वाष्पं मुंचतो यस्य शैलस्य स्नेहव्यक्तिः प्रेमाविर्भावो भवति स्निग्धा
नां हि चिरसंगतानां वाष्पपातो भवतीति भावः १२ रामः

मार्गमिति हे जलद तावदिदानीं कथयतः मम तु निःशेषः त्वत्प्रयाणस्यानुरूपमनुकूलं मार्गं म-
ध्वानं मार्गो मृगपदे मासे सौम्यर्क्षे त्वेषणे ध्वनीति यादवः श्रूयतां तदनु मार्गश्रवणानंतरं श्रोत्रा-
भ्यां पेयं पानार्हं अनिलस्य यास्यानव्यामित्यर्थः पेयग्रहणात्संदेशस्यामृतत्वसाम्यं गम्यते मे मम संदे-
शं वाचिके संदेशवाग्वाचिकं स्यादित्यमरः आप्रछसि यत्र मार्गे खिन्नः खिन्नो भीत्वा क्षीणो बलः

कथंभूतं मार्गं

त्व

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयं श्रोत्राभ्यां पानयोग्यं
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गंतासि यत्र क्षीणः क्षीणः परिलघु पयः स्रोतसां चोप-
भुज्य १३

सन् नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः शिखरिषु पर्वतेषु पदं न्यस्य निक्षिप्य पुनर्बललाभार्थं
क्वचिद्विश्रम्येत्यर्थः क्षीणः क्षीणो भीत्वा क्षयरोगः सन् अत्रापि पूर्ववत्तद्धितत्वात्सर्वत्र द्विरुक्तिः श्रो-
तसां परिलघु गुरुत्वदोषरहितं उपलास्फालनेन खेदितत्वात्पथ्यमित्यर्थः यदाह वाहट उ-
पलास्फालनाक्षेपविच्छेदैः खेदितोदकाः हिमवन्मलयोद्भूताः पथ्यास्ता भवेत्सरिति
पयः पानीयं उपभुज्य शरीरपोषणार्थमभ्यवहृत्य गंतासि गमिष्यसि गमेर्लृट् १३ रामः

मे॰ टी॰ ८

अद्रेरिति पवनो वायुरद्रेः शृंगं हरति किं स्वित् किंस्विच्छब्दो वितर्कार्थे चादिषु पठितः इति शंकया उन्मु
खीभिरुन्नमितमस्तकाभिः स्वांगात्क्षेपदर्शनादसंयोगोपदादिति एभिर्मुग्धाभिर्मुग्धाभिः सिद्धानां देवयोनिविशेषा
णां अंगनाभिः मुग्धः दृष्टः उत्साहो ययोरित्यमरः चकितचकितमपि चकितमकारेण यथा न यथा प्रकारे गुणवचनस्येति
द्विर्भावः दृष्टोत्साहो दृष्टसंरंभः सन्सरसाः आर्द्राः निचुलाः स्थलवेतसा यस्मिन्तस्मात् वानीरकविभेदस्यान्निचुलः
स्थलवेतसः इति शब्दार्णवे अस्मात्स्थानादाश्रमात्पथि नभोमार्गे दिग्नागानां स्थूला ये हस्ताः करास्तेषामवलेपान्
आलेपान् परिहरन् हस्तोन्नतत्वभेदस्याकारेभकरयोरपीति विश्वः उदङ्मुखः सन्नुत्पलकाया उदीच्यत्वादिमाशयः

अद्रेः शृंगं हरति पवनः किंस्विदित्युन्मुखीभिः दृष्टोत्साहश्चकितचकितं मुग्धसिद्धांगनाभिः स्थानादस्मात्सर
सनिचुलादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान् १४ खमाकाशमुत्पत उड्डय
अथ चेदमर्थान्तरं ध्वनयति सरसो रसिको निचुलो नाम कविः कालिदासस्य सहाध्यायः परापादितानां कालिदा
सप्रबन्धदूषणानां परिहर्ता यस्मिन्नास्थाने तस्मात् उदङ्मुखो निर्दोषत्वादुन्नतमुखः सन्पथि दिङ्नागाचार्यस्य
कालिदासप्रतिपक्षस्य हस्तविन्यासपूर्वकाणि दूषणानि परिहरन् अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि चेति विश्वः
अद्रेरद्रिकल्पस्य दिङ्नागाचार्यस्य शृंगं प्राधान्यं सानौ च अस्त्री स्यमरः हरतीति देवतासिद्धैः सारस्वतसिद्धैः महाकवि
भिरंगनाभिः स्त्रीभिश्च दृष्टोत्साहः सन्नत्र मत उच्चैर्मवेति स्वप्रबंधमात्मानं वा प्रतिकवेः कृतिरिति सम्मतो नादोष
गुणाभं वा मिः स्मेनेत्र्पायेन जलाशये पिस्थित्वा तु कुले निचुलस्थलं तमात्मानमात्मानमारतावि सिंधुवगादिमेनत

कृष्णजी

रत्नेति रत्नछायानां पद्मरागादीनां मणिप्रभाणां व्यतिकरो मिश्रणमिव प्रेक्ष्यं दर्शनीयं आखं-
डस्यैंद्रधनुःखंडमेतत् एतदिति हस्तनिर्देशो विवक्षितः पुरस्ताद्ग्रे वल्मीकाग्राद्धालूरविव-
रात् वा मल्लूरस्थनाकुस्थवल्मीकं पुंनपुंसकमित्यमरः प्रभवत्याविर्भवति येन धनुःखंडेन ते

समूह इव ईंद्रस्य

रत्नछायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ताद्वल्मीकाग्रात्प्र-
उत्पत्तिर्भ विद्यति भवति धनुःखंडमाखंडलस्य येन श्यामं वपुरतितरां कां-
तिमापत्स्यते ते बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५

कथंभूतेन बर्हेणा३

नवश्यामं वपुः स्फुरितरुचिना उज्ज्वलकांतिना बर्हेण पिच्छेन पिच्छबर्हे नपुंसके इत्यमरः गो-
पवेषस्य विष्णोर्गोपालस्य कृष्णस्य श्यामं वपुरिवातितरां कांतिं शोभामापत्स्यते प्राप्स्यति ॥ १५

म॰ दी॰
९

त्वयीति कृषेर्हलकर्मणः फलं सस्यं त्वयि अधिकरणे त्वविवदायां सप्तमी आयत्तमधीनं अधीनो
निघ्न आयत्तः इत्यमरः इति हेतोः प्रीत्या स्निग्धैः रक्तैः त्रिमसेमाईं रिसर्थैः भ्रूविकाराणां भ्रूविलासा
नामनभिज्ञैः ग्राम्यत्वादिति शेषः जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सन् अतिर
सयानिरीक्ष्यमानः सन् मालं मालाख्यं तत्र शैलप्रायमुन्नतस्थलं मालमुन्नतभूतलमित्युज्ज्वलः
सद्यस्तत्कालमेव सीरैर्हलैः उत्कर्षणेन सुरभिघ्राणतर्पणं यथा तथा आरुह्य तत्राभिज्ञानसम

त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीय-
मानः सद्यःसीरोत्कषणसुरभि क्षेत्रमारुह्य मालं किंचित्पश्चाद्व्रज लघुगतिर्भूय एवोत्त-
रेण ॥ १६ ॥

र्थैः सुरभिघ्राणतर्पणमित्यमरः किंचि पश्चाद्व्रज गच्छ लघुगतिः स्वल्पगतिर्विगलज्ज
लत्वादिति भावः लघुक्षिप्रमरं द्रुतमित्यमरः भूयः पुनरपि उत्तरेणैवोत्तरमार्गेणैव व्र
ज सानुषगः रतीयाभिधाने प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया यथा कश्चिन्नववल्लभाः
वर्तिकृतरचिता ते चैक तत्र गत्वा विरुह्य तत्र शरीरे केदारे सिद्धस्थानकल त्रयोरिति विश्वः दा
सिएव भेगा भयान्नीच मार्गेणानिगीर्यगुणः सर्वाध्वत्ते संचरति न तु चिति ध्वानि ॥ १६ ॥ सम॰ ९

न्यामिति आम्राःकूटाःकूटेषु शिखरेषु यस्य स आम्रकूटो नाम सानुपर्वतः आम्रश्चूतो रसालोसौ
सहकारोतिसौरभ इत्यमरः कूटोस्त्री शिखरं शृङ्गमित्यमरः आसारो धारासंपातः धारासंपात आ
सार इत्यमरः तेन प्रशमितो वनोपप्लवो दावाग्निर्येन तं तत्कृतोपकारमित्यर्थः अध्वश्रमेण परिग
तं व्याप्तं त्वां साधु यथा स्यात्तथा सम्यक् मूर्ध्ना वक्ष्यति वोढा वहेर्लृट् तथाहि क्षुद्रः कृपणोपि क्षुद्रो द

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः १
न क्षुद्रोपि प्रथमसुकृतापेक्षया संश्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः

रिद्रे कृपणोल्प इत्यमर इत्यादवः संश्रयाय संश्रयणाय मित्रे सुहृदि मित्रं सखा सुहृदित्यमरः प्रा
प्ते आगते सति प्रथमसुकृतापेक्षया पूर्वोपकारपर्यालोचनया विमुखो न भवति यस्तथा तेन प्रकारे
णोच्चैः उन्नतः स आम्रकूटः किं पुनर्विमुखो न भवतीति किमु वक्तव्यमित्यर्थः एतेन प्रथमावस
थे सौख्यलाभात्कार्यसिद्धिरस्तीति सूचितं तदुक्तं निमित्तमिदानं प्रथमावसथे सौख्येन तस्याखि
लेप्सितं भवति यात्रायामन्यथा त्वसंभवं ध्रुवमिति १७ रामः राम रामः रामः
अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूटस्तुङ्गेन त्वां जलदशिरसा वक्ष्यति श्लाघमानः आसारेण त्वमपि श
मयेस्तस्य नैदाघमग्निं सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु १८॥

छन्नेति हे मेघ परिणतैः परिपक्वैः फलैर्द्योतंत इति तद्योतैः आषाढे वनचूतानां फलानि पच्यंते च मेघवातेन नासा शयः काननाम्रैर्वनचूतैः छन्नोपान्तः आवृतपार्श्वो ऽचलः आम्राकूटाद्रिः स्निग्धवेणीसवर्णे मसृणकेशबंधतुल्ये श्यामवर्णे इत्यर्थः वेणी तु केशबंधे जलस्रुताविति यादवः त्वयि शिखरं शृंगमारूढे सति यस्य च भा वेन भावलक्षणमिति सप्तमी मध्ये श्यामः शेषे मध्यादन्यत्र विस्तारे परितः पाडुः हरिणः हरिणः पाडुः

छन्नोपांतः परिणतफलद्योतिभिः काननाम्रैस्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाडुः १८

रः पांडुरित्यमरः भुवः स्तन इव अमरमिथुनानां खेचराणामिति भावः प्रेक्षणीयां दर्शनीयामवस्थां नूनं यास्य
तिमिथुनग्रहणं कामिनामेव स्तन इव नोत्प्रेक्षा भवतीति सूचनार्थं यथा रतिश्रान्तः कश्चित्कामी कामिनीकुचक
लशे विश्रांतः स्वपिति तद्वदेवानयोर्भवः नायिकायाः स्तन इति ध्वनिः १८

स्थित्वेति हे मेघ वने चरंतीति वनचराः तत्पुरुषे कृति बहुलग्रहणादलुग्भवति तेषां वधूभिः भुक्ताः कुंजाः लतागृहाणि यत्र सः तस्मिन्निकुंजकुंजौ वा क्लीबे लतादिपिहितोदर इत्यमरः तत्र तेन येन विनोदासी मर्थः तस्मिन्नाम्रकूटे मुहूर्तमल्पकालेनतुचिरकाले स्वकार्यविरोधादिति भावः मुहूर्तमल्पकाले स्याद्घटिकाद्वितयेपि चेति शाश्वतः स्थित्वा विश्रम्य तोयोत्सर्गेण त्वयात्यक्तेन वर्षेण द्रुततरगति र्लाघवाहेतोः क्षिप्रगमनः सन् तस्मादाम्रकूटात्परमनंतरं तत्परं वर्त्म मार्गं तीर्णः अतिक्रांतः उपलैः

स्थित्वा तस्मिन्वनचरवधूभुक्तकुंजे मुहूर्तं तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः रे
वां द्रक्ष्यस्युपलविषमे विंध्यपादे विशीर्णां भक्तिच्छेदैरिव विरचितां भूतिमंगे गजस्य १९

पाषाणैः विषमे विंध्यस्याद्रेः पादे प्रत्यंतपर्वते पादाः प्रत्यंतपर्वता इत्यमरः विशीर्णां समंततो विसृमरां एतेन कस्याश्चिदनिकामुकाः प्रियचरणयातोपि ध्वन्यते रेवां नर्मदां रेवा तु नर्मदा सोमो द्भवा मेकलकन्यके इत्यमरः गजस्यांगे शरीरे भक्तयो रचनाः रेखा इति यावत् भक्तिर्निषेवणे भा गे रचनायां च इति शाश्वतः तासां छेदैः भंगिभिः विरचितां भूतिं शृंगारमिव भासितामिव वा भूति र्मातंगशृंगारे जातौ भस्मनि संपदीति विश्वः इत्यस्मिन्नध्वन्यपि महोत्सवे नयनकौतुकलाभ इति भावः २२

हे जलद त्वं गच्छेः किं कृत्वा तस्याः तोयं आदाय किंभूतं तोयं वनगजमदैः वासितं हे घन अनिलः त्वां तुलयितुं न शक्ष्यति किंभूतं त्वां अंतःसारं हि यतः सर्वः रिक्तः लघु भवति पूर्णता गौरवाय भवति १

मे॰ टी॰ ११ तस्यास्तिक्तैर्मेघ वांतवृष्टिः उद्गीर्णवर्षः सन् वह्नितव मन स्थवाम्यते वांते यत्र आदिश्रांतिक्वारादि दृश्यनिषेधः तिक्तैः
सुगंधिभिः तिक्तरसवद्भिः तिक्तो रसे सुगंधो वेति विश्वः वनगजमदैर्वासितं सुरभितं भाविनेव हि मद्वृष्टि
ध्यमलयागतानां भवानगाः इति विंध्यस्य गजप्रभवत्वात् इति भावः जंबूकुंजैः प्रतिहतरयं प्रतिबद्धवेगं
स्वलवेत्यर्थः अनेन लघुत्वं कषायभावना च दृश्यते तस्या रेवायास्तोयमादाय गच्छेः हे मेघ अंतः
सारो बलं यस्य स तं त्वामनिलः आकाशवायुः शरीरस्थः गम्यते तत्तुलयितुं न शक्ष्यति शक्तो न भविष्यति त

वांतः वृष्टि येन ॰ किंभूतं तोयं ॰ पीत्वा ॰ त्वं

तस्यास्तिक्तैर्वनगजमदैर्वासितं वांतवृष्टिः जंबूकुंजप्रतिहतरयं तोयमादाय गच्छेः अंतःसारं घन
ति तुलयितुं नानिलः शक्ष्यति त्वां रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय २० ॥

जंबूकुंजैः प्रतिहतः रयो यस्य तत्

खाली २

यादि रिक्तोंऽतः सारस्नेहः सर्वो लघुरगुरुर्भवति प्रकंप्यो भवतीत्यर्थः पूर्णता सारवत्ता गौरवाय आ
कंप्यत्वाय भवतीत्यर्थः अथ मंत्रध्वनिः आदौ वमनं पश्चात् पथ्यशोषणाय लघुत्वं
तः कषायपानात् बलस्य चातप्रकोपेन स्यादिति यथाह वाग्भटः कषायैः शादि मात्रास्य विशुद्धि
श्लेष्मणो हिताः किं पुनस्तिक्ताः कषायाः वातानि सर्गात् एव लावहाः तस्य हेः क्रमात् सीतर्थे पादाः पथ्यमो
जिनः वातादिभिर्न बाधा स्याद्विंदुद्वियैरिव योगिन इति २० ॥ ११

नीपमिति सारंगा भृंगा मातंगाश्च कुरंगाश्च सारंगाश्चातकेभभृंगेषु कुरंगे च मतंगजे इति विश्वः अर्द्धरूढैरेकदेशो-
द्गतैः केसरैः किंजल्कैः हरितं पालाशवर्णं पालाशो हरितो हरित् इत्यमरः कपिशः श्यामवर्णः श्यावः
स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते इत्यमरः हरितं च तत्कपिशं हरितकपिशं यथा
मवर्णाविति यावत् वर्णो वर्णेनेति समासः नीपं स्थलकदंबकुसुमं अथ स्थलकदंबके नीपः स्यात्पुलकः
प्रीमृष्याप्तेषु पुष्पो हरिप्रिय इति पाठान्तरे ऽपि वैरस्य ग्रासमभद्यादि दिने तिथा यावत् तथा कच्छेषु अनूपेषु अनु अनु

किं कृत्वा किंभूतं नीपं कलिका लताः कुसुम जलप्रान्ते दग्ध्वा तेषु स्थलेषु

नीपं दृष्ट्वा हरितकपिशं केसरैरर्द्धरूढै- राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छं जग्ध्वारण्ये-
ष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः सारंगास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥ २१ ॥

जलज ये चातकाः तेव किंभूतास्ते जललवमुचः कथयिष्यन्ति

केष्वव्ययं विभक्तीत्यादिना विभक्त्यर्थे ऽव्ययीभावः जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध इत्यमरः आविर्भू-
ताः प्रथमाः प्रथमोत्पन्नाः मुकुला यासां ताः कन्दलीः भूकन्दलीः द्रोणपर्णीः स्निग्धकंदां कन्दलीभूकन्द-
लयी इति शब्दार्णवे जग्ध्वा भक्षयित्वा अदो जग्धिर्ल्यप्ति किति इति अदेर्जग्ध्यादेशः अरण्येष्वधिकसुर-
भिमतिघ्राणतर्पणं दग्धारण्येषु क्षितिपादे दग्धमिश्ररण्ये विशेषणमधंवर्णानां किंतु कंदलीस्वदृष्टे-
सत्वयोर्हृष्टत्व्यः ऊर्व्याः भूमेर्गन्धमाघ्राय जललवमुचः उदकविंदुवर्षकान् ते मातंगास्तव सूचयिष्य-
न्ति यत्र यत्र हस्तिकार्ये नीपकुसुमादिकं दृष्ट्वा पतेन तत्र तत्र त्वया हृष्टमिति दृष्टमिरनुमीयत इत्यर्थः २१

मे॰टी॰
१२

प्तितमपि व्याख्यायते अंभइति अंभोविंदूनांवर्षोदकविंदूनांग्रहणेसमर्थंसद्यःपतितमेवनचातकु'
सेतिभूमिस्पृष्टोदकस्यतेषांरोगहेतुत्वात्तन्नग्रहणएवस्वीकारेचतुरान्चातकान्वीक्ष्यमाणाःको
तुकात्पश्यंतः अश्रेणयः श्रेणयोभूताः बद्धपंक्तीः अभूततद्भावेच्विः कुगतिप्रादयइतिसमासः अ'
थवा अश्रेणयः श्रेणयोभूताः अन्यापिव्यर्थविवक्षायांसर्ववत्समासः व्यर्थमात्रविवक्षायांतु'

अंभोविंदुग्रहणचतुरांश्चातकान्वीक्ष्यमाणाः श्रेणीभूताः परिगणनयानिर्दिशंतोबला
काः त्वामासाद्यस्तनितसमयेमानयिष्यंतिसिद्धाः सोत्कंठानिप्रियसहचरीसंभ्रमालिंगि
तानि २२

श्रेण्यादयःकृतादिभिरितिसमासः बलकाविशकंटिकाः परिगणनयाएकाद्वेत्रिरः इति
संख्यानेननिर्दिशंतोहस्तेनदर्शयंतः सिद्धाःकिन्नराः स्तनितसमयेत्वद्गर्जितकालेसो
त्कंठान्युत्कंठापूर्वकाणिप्रियसहचरीणांसंभ्रमेणालिंगनान्यासाद्यस्वयंग्रहाश्लेषसुख'
मनुभवेत्यर्थः त्वांमानयिष्यंतिश्लाघयिष्यंतित्वन्निमित्तत्वात्तत्सुखलाभस्येत्यर्थः २२ रामः १२

उत्पश्यामीति हे सखे मेघ मत्प्रियायाः मत्प्रियार्थं तया तयाऽद्रुतं दितिं मेलनं द्रुतमिति समरं द्रुतमित्यमरः यियासो
र्यातुमिच्छोरपि यातेः सन्नन्ताडुः प्रत्ययः ते तव ककुभैः कुटजकुसुमैः सुरभौ सुगंधिनि ककुभः कुट
जोः अर्जुन इति शब्दार्णवे पर्वते पर्वते प्रतिपर्वते वीप्सायां द्विरुक्तिः कालक्षेपं कालविलंबं क्षेपो विलं
बे स्यात् अर्जुनः विलंबे निंदायामिति विश्वः उत्पश्यामि उत्प्रेक्षे विलंबहेतुं दर्शयन्नाशुगमनं प्रार्थयते
शुक्लेति सजलानि सानंदबाष्पाणि नयनानि येषां तैः शुक्लापांगैः शिखावल इति यादवः केकाः स्ववाणैः

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते शुक्लापां
गैः सजलनयनैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथमपि भवान् गंतुमाशु व्यवस्येत् २२ ॥

केकावाणी मयूरस्येत्यमरः स्वागतीकृत्य स्वागतवचनीकृत्य प्रत्युद्यातः प्रत्युद्गतः सन् अतिथ्य इत्यर्थः
भवानाश्वमपि यथाकथंचिदाशु गंतुं व्यवस्येत् उद्युञ्जीत प्रार्थने लिङ् शेषे प्रथम इति प्रथमपु
रुषः शेषस्त्वाणे भवच्छब्दो युष्मदर्थे व्यतिरेकात् स्वागतीकृत्य केकाः स्वारोपमापाद्य स्वा
गतवचनस्य प्रकृतप्रस्तुतमनोपयोगात् स्वपरिणामालंकारः तदुक्तमलंकारसर्वस्वे आरोप्य
माणस्य प्रकृतोपयोगित्वे परिणाम इति २२ गमः

मे॰दू॰
टी॰
२३

पाण्डुरिति हे मेघ त्वय्यासन्ने समीपे सति दशार्णा नाम जनपदाः सूचिभिन्नैः सूचिः मुकुलाग्रं तेषु भिन्नैः वि
कसितैः केतकीमुकुलाग्रस्वपित्रविसादिनिशब्दार्णवे केतकैः केतकीकुसुमैः पाण्डुच्छाया पाण्डु
वर्णा उपवनानां वृतयः कंटकशाखावरणानि येषु ते तथोक्ताः प्राचीनं प्रांततो वृतिरित्यमरः
तथा गृहबलिभुजां काकादीनामापादितैर्नीडारंभैः कुलायनिर्माणैः कुलायो नीडमस्त्रि
यामित्यमरः चित्याया इमानि रथ्यावृक्षा चैत्यमायतने बुद्धबिंबे चोपानपादप इति विश्वः आ

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैः नीडारंभैर्गृहबलिभुजामाकुलग्रामचैत्याः
त्वय्यासन्ने परिणतफलश्यामजंबूवनान्ताः संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशा
र्णाः २५

कुलानि संकीर्णानि ग्रामेषु चैत्यानि येषु ते तथोक्ताः तथा परिणतैः परिपक्वैः फलैः श्यामानि यानि
जंबूवनानि येषु ते तेनांतरम्याः रम्याववसिते रम्ये समाप्तावंत इष्यत इति शब्दार्णवे तथा कतिपयेषु
दिनेषु स्थायिनो हंसा येषु ते तथोक्ताः एवंविधाः संपत्स्यन्ते संभविष्यन्ति पोदाशु वेति लोकः कतिपये
मात्रदिना कतिपयशब्दास्यानरपदत्वेपि न तच्छब्दस्योत्तरत्तु मत्स्यस्य शास्त्रस्यापि कत्वान् २५ ॥ २३

तेषामिति दिक्षु दिशासु प्रथितं प्रसिद्धं विदिशेति लक्षणं नामधेयं यस्याः सा लक्षणा तां नाम्नि विद्दे वे
ति विश्वः तेषां दशार्णानां संबंधिनीं धीयंते ऽस्यामिति धानी करणाधिकरणयोश्चेति ल्युट् ङीप् लक्षणा च्छे
ममस्त इति वल्लभा समासः राज्ञां धानी राजधानी तां राजधानीं प्रधाननगरीं राज्ञां राजधानीति कथ्य
ते इति शब्दार्णवे गत्वा प्राप्य सद्यः शीघ्रं कामुकत्वस्य विलासिताया विलासी कामुकः कामी स्त्रीपरो
रतिलंपट इति शब्दार्णवे अविकलं समग्रं फलं प्रयोजनं लब्धा लप्स्यसे लिंगनिशेषः कर्मणि लुट्

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा
तीरोपांतस्तनितसुभगं पास्यसि स्वादु येयं सभ्रूभंगं मुखमिव पयो वेत्रवत्याश्चलोर्मि २५

तः यत् यस्मात् कारणात् स्वादु मधुरं चलाः ऊर्मयो यस्य तच्चलोर्मि तरंगितं वेत्रवत्या नामन
द्याः पयः सभ्रूभंगं भ्रुकुटियुक्तं दशनपीडयेति शेषः मुखमिवाधरमिव स्पर्शः तीरोपांते
तटप्रांते यत्स्तनितं गर्जितं तेन सुभगं यथा स्यात्तथा स्तनितशब्देन मणितमपि ध्वन्यते ऊर्ध्व
मुच्चलितं कंठनासिकाभ्यां कलकलितमस्फुटोपपदिति मणितलक्षणात् पास्यसि धा
धास्यसि पिबते र्लृट् कामिनामधरास्वादः सुरतादतिरिच्यत इति भावः २५

मे॰ दू॰ टी॰ १५ नीचैरिति हे मेघ तत्र विदिशासमीपे विश्रामो विश्रामः खेदापनयः भावार्थे घञ्प्रत्ययः स एव हेतुस्तस्य विश्रामहेतोः वि
श्रामकारणात् विश्रामार्थमित्यर्थः षष्ठी हेतुप्रयोगे इति षष्ठी विश्रामस्यैव तत्र नोदात्तोपदेशस्य मान्तस्यानाचमेरि
ति पाणिनीये वृद्धिप्रतिषेधोऽपि विश्रामो वेति चान्द्रव्याकरणे विकल्पेन वृद्धिविधानाद्वैयर्थ्यप्रसिद्धिः प्रौढपु
३ ष्पैः वहन् गतस्त्वमेः कदम्बैर्नीपवृक्षैः त्वत्संपर्कात्पुलकाः अस्य संजाताः पुलकितमिव संजातः पुलकमिव स्थितं वा
रकादित्वादितच्प्रत्ययः नीचैरित्याख्या यस्य तं नीचैराख्यं गिरिमधिवसेः गिरौ वसेरित्यर्थः उपान्वध्याङ्वस इति क
र्मत्वं नीचैर्गिरिः पण्याः क्रेयाः स्त्रियः पण्यस्त्रियो वेश्याः वारस्त्री गणिका वेश्या पण्यस्त्रीत्यमरः विनीति शब्दा

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोः त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः यः
पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणां उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि

णिवेतानां रतिषु यः परिमलो गन्धविशेषः विमर्दोत्थे परिमलो गन्धे जनमनोहरे इत्यमरः तमुद्गिरन्त्याविः
ष्कुर्वन्तीति तथोक्तानि तैः शिलावेश्मभिः कंदरैः नागराणां पौराणां उद्दामानि उत्कटानि यौवनानि
प्रथयति प्रकटयति उत्कटयौवनात् कचित् अनुरक्ता वराङ्गनाः विश्रम्भविहारकाङ्क्षिण्यो मात्रादिभ
यान्निशीथसमये केचन विविक्तवनप्रदेशमाश्रित्य रमयन्ति न चात्र वक्तव्यमश्लीलमिति प्रसिद्धिप्रद्योद्गारि
णाद्धस्य गौणार्थत्वात्तज्ञस्य भावहेः प्रस्तुतकाव्यस्यातिशोभाकरत्वात् तदुक्तं दण्डिना निष्ठ्यूतोद्गीर्णवा
न्तादिगौणवृत्तिव्यपाश्रयाः अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते इति २६ ॥ २६ रामः १५

विश्रांत इति विश्रांतः सन् व्रज नीचैर्गिरौ वनीनाध्वश्रमः सन् हे अथ विश्रांतेरनंतरं वननेत्रपणेयान घः ज्ञासो
नीरेषु यानि स्वयं रूढानि अकृतानि मार्गाणीत्यर्थः नदनदीति पाठे तु पुष्पमानस्त्रियेत्येकशेषो द्वंद्वः उद्यानानामा
रामाणां संबंधीनि यूथिकाजालकानि मागधीकुसुममुकुलानि अथ मागधी गणिका यूथिकांबष्टेत्यमरः
कोरकजालकत्कुलकलिकाकुड्मलानि तुल्यानीति हलायुधः नवजलकणैः सिंचन् आर्द्रीकुर्वन् अयं सिं
चनं आर्द्रीकरणार्थत्वात् द्रवद्रव्यस्य करणत्वं यत्र तत्र तरणाभिमत्यर्थः न तु द्रवद्रव्यस्य कर्मत्वं यथा रेतः सिक्तं मा

विश्रांतैर्थ व्रज वननदीतीरजातानि सिंचन्नुद्यानानां नवजलकणैर्यूथिकाजालकानि गंड
स्वेदापनयनरुजा क्लांतकर्णोत्पलानां छायादानात्क्षणपरिचितः पुष्पलावीमुखानां २२ ॥

गंडस्वयोनिर्घर्मजास्वेदस्तयामुखे निषिंचेत मिवास्तेनवीत्येवमादि किरतीत्यादिना मपि रजभकियतिमा
कृतं अथवा छिरन्वयो हृद्यास्तजाले पौरयोषित इत्यादिष्वर्थभेदाश्रयेणारंभो लाजादीनां कार्येन कारण
त्वेगमयितव्यतया गंडयोः कपोलयोः स्वेदस्यापनयनेन अपमार्जनेन या रुजा पीडा अभिघातादिना दृढः अ
त्तया क्लांतानि म्लानानि कर्णोत्पलानि येषां तेषां पुष्पाणि लुनंतीति पुष्पलाविकाः स्त्रियः कर्मण्यण
टिड्ढाणञित्यादिना ङीप् तासां मुखानि तेषां छायायाः अनातपस्य दानात् कांतिदानेन च ध्वन्यते छायात्वना
मध्ये कोनाविमाम रः कामुकदर्शनात् कामिनीनां सुखविकाशो भवतीति भावः क्षणपरिचितः क्षणं संस्

मेघदूतटीका १२

मे॰ दू॰ टी॰ २५

वक्रइति उत्तराशां उदीचीं दिशं प्रति प्रस्थितस्य भवतः पंथा उज्जयिनीमार्गो वक्रो यदपि दूरो यद्यपीत्यर्थः
विंध्यादुत्तरवाहिन्या निर्विंध्यायाः पश्चिम इति यथा वक्रत्वं तथाप्युज्जयिन्या विशाला नगरस्य विशालो
ज्जयिनी समे इत्यमरः सौधानामुत्संगेषूपरिभागेषु प्रणयः परिचयः प्रणयः स्यात्परिचये याञ्चा
यां सौहृदेपि चेति यादवः तस्य विमुखः पराङ्मुखो मास्मभूः माभवेत्यर्थः स्मोत्तरे लङ् चेति

वक्रः पंथा यदपि भवतः प्रस्थितस्योत्तराशां सौधोत्संगप्र
णयविमुखो मास्मभूरुज्जयिन्याः विद्युद्दामस्फुरितचकितैस्त
त्र पौरांगनानां लोलापांगैर्यदि न रमसे लोचनैर्वंचितोसि २८

चकारादाशीरर्थे लुङ् न माङ्योग इत्यडागमप्रतिषेधः तत्रोज्जयिन्यां विषये विद्युद्दाम्नां त
डिल्लतानां स्फुरितेभ्यः स्फुरणेभ्यः चकितैः भीतैः लोलापांगैश्चलकटाक्षैः पौरांगना
नां लोचनैर्न रमसे यदि तर्हि वंचितः प्रतारितः स्याः जन्मवैफल्यं भवेदित्यर्थः २८ ॥ २५

संप्रति उज्जयिनीं गच्छतस्तस्य मध्ये मार्गे निर्विंध्यायाः संबंधमाह वीचीति हे सखे पथि उज्जयिनीपथे वी
चीक्षोभेण स्तनितं चलनेन स्वनितानां मुखराणां विहगानां हंसादीनां श्रेणीः पंक्तिरेव कांचीगुणो य
स्याः स्खलितेन उपलस्खलनेन संदर्शविलितेन चलद्भंग यथा तथा संसर्पंत्याः प्रवहंत्याः गच्छंत्याः स्ख
लद्गत्या दर्शितो नाभिरूपः आवर्तो यया तस्याः अंभसां अभ्यंतरः निर्विंध्या नाम नदी निरोद्धयं क्रांता यथेपंच

स

वीचिक्षोभस्तनितविहगश्रेणिकांचीगुणायाः संसर्पंत्याः स्खलितसुभगं दर्शितावर्तनाभेः
निर्विंध्यायाः पथि भव रसाभ्यंतरः संनिपत्य स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥२८॥

नद्याः
मेति समासः स्त्रियाः आद्यापचेत्यादिना परवल्लिंगताप्रतिषेधः तस्याः संनिपत्य संगत्य सरसो जलमध्ये
तरं यस्य सः अन्यत्र रसेन शृंगारेण अभ्यंतरो भव अंतरंगो भव सर्वथा तत्समनुभवेत्यर्थः शृंगारादौ जले वी
र्ये रसवर्णे विषये द्रवे रसो ना आस्वादे च रसं प्राहुरिति शाश्वतः ननु तत प्रार्थनांतरेणाकथं तत्रानुभ
वो युज्यते इत्यत आह स्त्रीणामिति स्त्रीणां प्रियेषु विभ्रमो विलास एवाद्यं प्रणयवचनं प्रार्थनावाक्यं हि
स्त्रीणामेष स्वभावो यद्विलासैरेव रागप्रकाशनं न तु कंठत एवेति भावः विभ्रमस्त्रागमनाभिसंदर्शना

निर्विंध्यां प्रस्थाय इत्यत्र वेणी वणीभूतं वेणीभूतं प्रतनु स्तोकं च सलिलं यस्याः सा तथोक्ता वेणीभूतेति वक्रे मापाशो
ध्वनस्ते रूढेती निरूढाः उग्रपधलत्तणः कमस्पर्शः तद्योरूढाः क्षेप्यपेत रवृक्षेभ्यो भ्रंशंतीति तथोक्तैः जीर्णैप
र्णैः शुष्कपत्रैः पांडुच्छाया पांडुवर्णा अत एव हे सुभग विरहावस्थया श्रवीत्म कारणेन अतीतस्य प्रतावंते
कालमतीमगतस्य प्रोषितस्य ते तव सौभाग्यं सुभगत्वेहृदं भगसिंध्वजे एवं पदस्तेतु भयपदहाहिस्वंज
यंती प्रकाशयंती सर्वलस्तभगोपमेगताः काम्यत इति भावः सा एवीतका सिंधुने दी निर्विंध्या हीनयान

वेणीभूतप्रतनुसलिला सावतीतस्य सिंधुः पांडुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः
सौभाग्यं ते सुभग विरहावस्थया व्यंजयंती कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ३०

देसिंधुर्देशभेदेप्यनुधीगज इति वैजयंती येन विधिना व्यापारेण कार्श्यं त्यजत स विधिस्त्वयैवोपपाद्यः कृतो
पाइत्यर्थः स विधिरेकत्र हारिरन्यत्र संभोगः तदभाव निवेधनत्वात्मकपंप स्येति भावः इयं पंचमी मदनाव
स्या उक्तं च रतिरहस्ये नयनप्रीतिः प्रथमं चिंतासंगस्ततोथ संकल्पः निद्राच्छेदस्तनुता विषयनिवृत्ति
स्त्रपानाशः उन्मादो निरिमेतोः स्मरदशा दशैव स्युरिति तिनामतीगस्येति पाठमाश्रित्य सिंधुर्नाम नदयेतरः
मितिव्याख्याने सिंधुनामकश्चित्तद विशेषः काश्मीरदेशे स्थितः नदी तु झ्याणिना स्त्रीत्वपेदमावहते इः १९

णयेतिविंदंतीतिविदाः इगुपधलक्षणः कप्रत्ययः ओकसोस्थानस्य विदाः कोविदाः ओकारेलुप्तेटघोदः
वादिनास्साधुः उदयनस्यवत्सराजस्यकथानोवासवदत्ताहरणाद्यस्तोपाख्यानानांकोविदास्तत्वज्ञा
ग्रामेषुयेवृद्धास्तेषुतानअवंतीनूनामजनपदानप्राप्यतत्रपूर्वोद्दिष्टांपूर्वोक्तांसौधोत्संगप्रणयवि
मुखोमास्मभूरुज्जयिन्याइत्युक्तामित्यर्थः श्रीविशालांसंपयुक्तांशोभासंपत्तिपद्मासुलक्ष्मीः श्रीरितिवैद
रूपते इति शाश्वतः विशालांपुरींउज्जयिनींविशालोज्जयिनीसमेत्यमरः त्वंअनुसरव्रजकथमिवस्थि

प्राप्यावंतीनुदयनकथाकोविदग्रामवृद्धान्पूर्वोद्दिष्टामनुसरपुरींश्रीविशालांविशालां ॥
स्वल्पीभूतेसुचरितफलेस्वर्गिणांगांगतानांशेषैःपुण्यैर्हृतमिवदिवःकांतिमत्खंडमेकम् ॥२९॥

नांसुचरितफलेपुण्यफलेस्वर्गोपभोगलक्षणेस्वल्पीभूतेसतिअल्पावशिष्टेसतीत्यर्थः गांभूमिंगः
तानांगौरिलाकुंभिनीत्यमरः पुनरपिभूलोकमागतानामित्यर्थः स्वर्गिणांस्वर्गवतांजनानांशेषैर्भु
क्तशेषैः पुण्यैः सुकृतैर्हृतमानीतंस्वर्गार्थानुष्ठितकर्मणोयाणांस्वर्गदानावशेषभावादिति भावः
कांतिरस्यास्तीतिकांतिमत् उज्वलंसारभूतमित्यर्थः एकंमुख्यकादयान्त एकेमुख्यान्यकेवलाइत्यमरः
दिवः स्वर्गस्यखंडमिवस्थितामित्युत्प्रेक्षालंकारेणाक्रांतसकलभूलोकनगरसौभाग्यसारत्वमुज्जयिन्या

मे॰ टी॰ १८

प्रक्षिप्तमिदं पद्यमवसे २८ ॥

दीर्घीकुर्वन्निति यत्र विशालायां प्रत्यूषेषु प्रहरेषु प्रत्यूषोद्गमे रवेवसाविति विस्पष्टः पटु मस्फुटं मदकलं मदेनाव्यक्तमधु
रं ध्वनितं मधुरास्फुटं कलं इत्यमरः सारसानां पक्षिविशेषाणां सारसो मैथुनी कामी गोनर्द इति पुष्कराह्व इत्यमरः
यद्वा सारसानां हंसानां चक्राङ्गः सारसो हंस इति शाश्वतः कूजितं रुतं दीर्घीकुर्वन् संभावनमित्यर्थः यद्वा नि शब्दा
नुवृत्तिरिति भावः पतनं प्रियामाश्वासयन् चाटुवाक्यमनुरिक्तीशपवित्रं कूजितं दीर्घीकुर्वन्निति विशिनष्टि कुर्वन्निव गम्यते
स्फुटितानां विकासितानां कमलानां आमोदेन परिमलेन सह मैत्र्या संसर्गेण कषायः सुरभिः रागद्रव्यकषायो स्त्री
नियासे सौरभे रसे इति यादवः अन्यत्र विमर्दगन्धीत्यर्थः विमर्दोत्थे परिमलो गन्धे जनमनोहरे आमोदः सोतिनिर्हा

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः यत्र स्त्रीणां हरति
सुरतग्लानिमङ्गानुकूलः शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३२ ॥ रीत्यमरः अङ्गानुकूलः सा

यात् सुखस्पर्शः अन्यत्र गाढालिङ्गनेदत्तगात्रसंवाहनइत्यर्थः भवभूतिना चोक्तं अशिथिलपरिरम्भदत्तसं
वाहनानीति संवाहनं तेच रतिश्रान्ताः शिप्रेः यतः क विरवद्दत्याति संभोगान्ते मम समुचितो हस्तसंवाहनानामि
ति शिप्रानाम काचित्सरित् नदी तस्या वातः शिप्रावातः शिप्राग्रहणं सौरभ्योत्कर्षार्थं प्रार्थना सुरतयाचना तत्र चाटूनि
करोतीति सतथोक्तः पुनः सुरतार्थं प्रियवचनप्रयोक्तेत्यर्थः क्रमेणैव प्रियतमो वल्लभ इव स्त्रीणां सुरतग्लानिं प
वं रतिविदं हरतिवेद हरतिवदति चाटूनि विस्मृत्य सर्वखेदाः स्त्रियः प्रियतमप्रार्थनां सफलयन्तीति भावः प्रार्थना
चाटुकारः खण्डितेनापि कामिनेनयेनेति व्याख्याने प्रियतमाः सुरतग्लानिहरणे न संभवतीतिस्थान पूर्वं सुरतेन भा
वात् पश्चात्तेन सुरतग्लानिहरणात् नेदानीं तनीन कोपोपशमेन प्रार्थनाचाटुवचनसाध्यशिप्रेतो वोचिता

इतःपरंप्रक्षिप्तमपिश्लोकत्रयंव्याख्यायतेहारानिति यस्यांविशालायांकोटिशोविपणिषुपण्यवीथि
कासुरचितान्प्रसारितान्विपणिःपण्यवीथिकेत्यमरः इदंचविशेषणंयथालिंगंसर्वत्रसंबध्यतेतारान्शु
द्धान्तारोमुक्तादिसंशुद्धौतरलेशुद्धमौक्तिकेइत्यमरः तरलगुटिकान्मध्यमणिभूतमहारत्नानितरलो
हारमध्यगइत्यमरः पिंडेमणौमहारत्नेगुटिकावटिकापरदइतिशाब्दार्णवे हारान् मुक्तावलीः तथाको
टिशोऽनेकशः शंखाश्चशुक्तयश्चयस्यांमुक्तास्फोटास्ताःशंखशुक्तीः मुक्तास्फोटः स्त्रियांशुक्तिःशंखः

हारांस्तारांस्तरलगुटिकान्कोटिशःशंखशुक्तीः शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहा
न् दृष्ट्वायस्यांविपणिरचितान्विद्रुमाणांचभंगान्संलक्ष्यन्तेसलिलनिधयस्तोयमात्रावशेषाः ३२

स्यात्कंबुरस्त्रियामित्यमरः शष्पंबालतृणंतद्वत्श्यामान्शष्पंबालतृणंघासोयवसंतृणमर्जुन
मित्यमरः उन्मयूखप्ररोहान् उद्गतरश्म्यंकुरान्मरकतमणीन् गारुडरत्नानि तथाविद्रुमाणांप्रवा
लानांबालखंडांश्च दृष्ट्वासलिलनिधयः समुद्रास्तोयमात्रमवशेषोयेषांतेतथोक्ताः संलक्ष्यन्तेत
थानुमीयन्तइत्यर्थः रत्नाकरादप्यतिरिच्यतेऽस्यसंपद्भिरितिभावः ३२ ॥

मे॰टी॰ १८

प्रद्योतस्येति अत्र प्रदेशे वत्सराजो वत्सदेशाधीश्वरः उदयनः प्रद्योतस्य तन्नाम्नः उज्जयिनीनायकस्य रा
ज्ञः प्रियदुहितरं वासवदत्तां जह्रे जहार अत्रास्मिन्स्थले तस्यैव राज्ञः प्रद्योतस्यैव हैमं सौवर्णं तालद्रुमवनं
मभूत् अत्र नलगिरिनामेन्द्रदन्ती यो गतो दर्पान्मदात् स्तंभमालानमुत्पाट्य उद्भ्रान्तो भ्रान्तोऽ

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे हैमं तालद्रुमवन
मभूदत्र तस्यैव राज्ञः अत्रोद्भ्रान्तः किल नलगिरिः स्तंभमुत्पा
ट्य दर्पा दित्यागन्तून्रमयति जनो यत्र बंधूनभिज्ञः ३५ ॥

त्स सभ्रमणं कृतवानिति इत्थंभूताभिः कथाभिरित्यर्थः अभिज्ञः पूर्वोक्तकथाकोविदो जनः आगंत
न् सितनिगमीत्यादिना उणादिकस्तुन्प्रत्ययः बंधून् यत्र विशालायां रमयति विनोदयति
अत्र भाविकालंकारः तदुक्तं अतीतानागते यत्र प्रत्यक्षत्वेन लक्ष्यते अत्यद्भुतार्थकथनाद्भाविकं

१८ ३५

यत्रेति यत्र विशालायां वहाः हयाः यत्र श्यामाः पलाशवर्णाः अत एव दिनकरवहस्य स्पर्द्धिनः वर्णतो
वेगतश्च सर्वाः स्वकत्वाः तथा शैलोदग्राः शैलवदुन्नताः करिणः प्रभेदात् मदस्रावाद्धेतोः त्वमिव
वृष्टिमंतः अग्रेनयंतीत्यग्रण्यः सन्मुखे हि शोभ्यादिनाधिक्ये यः अग्रग्रमाभ्यां नयते योधाः वक्तव्य इति णत्वं यो

यत्र श्यामा दिनकरहयस्पर्द्धिनो यत्र वाहाः शैलोदग्रास्त्वमिव
करिणो वृष्टिमंतः प्रभेदात् योधाग्रण्यः प्रतिदशमुखं संयुगे
तस्थिवांसः प्रत्यादिष्टाभरणरुचयः चंद्रहासव्रणांकाः ३५

धाग्रण्यो भटश्रेष्ठाः संयुगे युद्धे प्रतिदशमुखमभिरावणं तस्थिवांसः स्थितवंतः अत एव चंद्रहास
व्रणांकाः रावणासित्तनान्यवविह्नानितैः चंद्रहासो रावणस्यासिमात्रेपि चक्रविदिति शाश्व
तः प्रत्यादिष्टाभरणरुचयः प्रतिषिद्धभूषणकांतयः शास्त्रशूरा एव वीराणामाभरणमिति
भावः अत्रापि भाविकालंकारः लक्षणं तत्क्रम ३५ ॥

जालोद्गीर्णैरिति जालोद्गीर्णैः गवाक्षमार्गनिर्गतैः जालं गवाक्ष आनाये जालकेऽकपटे गणे इति या
दवः केशसंस्कारस्य धूपैः वनिताकेशवासनार्थैर्गंधद्रव्यरूपैरित्यर्थः अत्र संस्कारधूपयोस्ताद
र्थ्येऽपि यूपदार्वादिवत्प्रकृतिविकारत्वाभावात् अश्वघासादिवत् षष्ठीसमासो न चतुर्थीसमासः उ
पचितवपुः परिपुष्टशरीरः बंधोर्वधुरिति वा प्री बंधुप्रीत्या भवनशिखिभिर्गृहमयूरैर्दत्तो नृत्यमे॰

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपैर् बंधुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः हर्म्ये॰
ष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः लक्ष्मीं पश्यन् ललितवनितापादरागांकितेषु ३६

वोपहार उपायनं यस्मै तथोक्तः उपायनमुपग्राह्यमुपहार इत्यमरः कुसुमैः सुरभिषु सुगंधि
षु ललितवनिताः सुंदरस्त्रियः ललितं त्रिषु सुंदरमित्यमरः तासां पादरागेण लाक्षारसेनांकि
तेषु हर्म्येषु धनिकभवनेषु अस्या उज्जयिन्या लक्ष्मीं पश्यन् अध्वनाध्वगमनेन खेदमध्वखेदं न
येथा अपनय ३६ ॥

भर्तुः भर्तुः स्वामिनो नीलकंठस्य भगवतः कंठसेवकस्य विधिस्यासौ कंठच्छविरितिहेतोर्गणैः प्रमथैर्गणा
स्तु गणनाया स्पाङ्गणेशाः प्रमथाश्च यदितिशब्दार्णवे सादरं यथा नयावीक्ष्यमाणाः सन् प्रियवल्लभा
हृदयाद नितिप्रियत्वं भवेदितिभावः त्रयाणां भुवनानां समाहारस्त्रिभुवनं तद्धितार्थेत्यादिना समासः
पात्रादिभ्यः प्रतिषेधो वक्तव्य इति वक्तव्यात स्त्रीलिंगताप्रतिषेधः त्रिभुवनस्य गुरोः स्वलोकनाथस्य वे
शेश्वरस्य कामायनीवल्लभस्य पुण्यं पावनं धाम सहकाला स्वमतत्र्यंस्य स्थाने यायाः गच्छविध्यर्थे लिङ् प्रथम

भर्तुः कंठच्छविरितिगणैः सादरं वीक्ष्यमाणः पुण्यं यायास्त्रिभुवनगुरोर्धाम चंडीश्वरस्य धूतो
द्यानं कुवलयरजोगंधिभिर्गंधवत्याः स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ३० ॥

त्वात्सर्वं यागेन वक्ष्यमितिभावः अन्यच्च स्कंधे आकाशे तारकालिंगे पाताले हाटकेश्वरे मर्त्यलोके महाकालेद
इत्याकामितमान्यया यिजितकेवलमुक्तिस्थाने किंतु विलासस्थानमपीत्याह धूतेति कुवलयरजो गं
धिभिः कमलपरागगंधवद्भिः तोयक्रीडासु निरतानामासक्तानां युवतीनां स्नाने स्नानीयं चंदनादिक
रेणुल्य इत्यानीयेः भिषवस्नानमितिमाधवः तेन तिक्तैः सुगंधिभिः कटुतिक्तकषायास्तु सौरभे गंधे इत्यम
रः तिक्तः इति हलायुधः सौगंध्यातिशयार्थं विशेषणद्वयं गंधवत्या नामनद्यास्तत्रयापानहरुद्भिर्मरुद्भिः
धूतोद्यानं कंपितक्रीडमिति धाम्नो विशेषणम् ३०

मे॰दू॰ अपीतिहेजलधरमहाकालंनामप्रवोतंचंडीश्वरस्यानेअन्यस्मिन्नंध्यातिरिक्तेपिकालेआसा
२० द्यप्राप्यतेतवस्थानत्वंत्वयास्थेयमित्यर्थः॥ कस्मात्॥ कर्तव्रिवेतिषष्ठीयावत् यावताकालेनभा॰
नुःसूर्योनयनविषयंदृष्टिपथमत्येतिआक्रामतिआलभ्यतावत्तस्थानंत्वयावरणार्थीयावता

अप्यन्यस्मिन्जलधरमहाकालमासाद्यकाले स्थातव्यंतेनयन॰
विषयंयावदत्येतिभानुः॥ कुर्वन्संध्यावलिपटहतांशूलिनःश्लाघ्य
नीयां मामंद्राणांफलमविकलंलप्स्यसेगर्जितानां ३८ ताम॰

बहुसाकल्येऽवधौःमानेवधारणाइत्यमरः॥ किमर्थमतआह कुर्वन्निति श्लाघनीयामप्रसांशूलिनः
शिवस्यसंध्यायापोवलिः॥ तत्रपटहताकुर्वन्संपादयन् आमंद्राणामीषद्गंभीराणांगा॰
र्जितानामविकलमखंडफलंलप्स्यसेप्राप्स्यसिलभेः कर्तरिलृट्॥ महाकालनाथवलिपटहत्वेनविनि

॥ योगनातेगतिनसापस्थंस्थाहिस्थिः २८

पादन्यासैरिति तत्र संध्याकाले पादन्यासैर्नृत्यसंगैः क्वणिताः रशना मेखला यासां तासां तथोक्ताः क्वणिता र
कमेकत्वाद्धस्तयोकमेके स्यादित्यावर्त्तेरितः लीलया विलासेनावधूतैः कंपितै रत्नानां कंकणमणीनां
छायया कांत्या खचिता रत्निता वलयः यस्य चामरदंडस्य येषां तैः वलिभिश्चामरैर्दंडीवतत्याविस्मयवर्मणीतिविश्वः
चामरैर्वालव्यजनैः क्लांतहस्ताः पतेनैर्देशिकेंद्रंमसविते तडकेंद्रमसर्वेस्वेरखरुकंकंहक वस्तादेंद्रिकाचाम

पादन्यासक्वणितरसनास्तत्र लीलावधूतैः रत्नछायाखचितवलिभिश्चामरैः क्लांतहस्ताः वेश्या
स्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रविंदून् आमोक्ष्यंते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ३५

रस्तजः वीक्षां धृत्वा नयनकुंभेनरेसंततैः शिकं भवेदिति वेश्याः महाकालनाथमुपेत्य नृत्यतो गणिकास्त्वत्तो
नखपदेषु नखक्षतेषु सुखान् सुखाकरान् सुखदेहतो सुखे सुखमिति शब्दाणो वेवर्षस्याग्रविंदून् प्राप्य
त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् पांगानामोक्ष्यंते परेरूपलक्षताः संतासयः पश्चपत्रवेतोति भाः
वः कामिनीदर्शनीयत्वलक्षणं शिवोपासनफलं सद्यो लप्स्यसीति ध्वनिः ३५ ॥

म॰ टी॰ २१

पश्चादि लिपिस्त्वालं ध्यावल्पनेनतं पशुपते शिव स्मरस्यारंभेतांडवमारंभे मतिनवजयापुष्परसं प्रत्ययजयात्तस्तमा
हतामंध्यायाभवसाध्यतेजोदधानः उद्वेहत्वंतभुजा एवतरवस्तेषावनमंडलमंडलेनमंडलाकारेणाभिली
नः श्रीमिश्रानः सन्नजरितुः भवान्याः भवपत्न्याः इदंवहणाभवणावैस्यादिनाउशिपश्चानगागमस्त्रशांतउद्वेगो
गामश्रुशांतउद्वेगोगजाजिनदर्शनभयपयोस्तेश्रतएवालिमितेनिश्चलनयेन यस्मिन्कर्मणिनत्तयोकेउद्वे
गस्त्वरितेसेषोभयमेघुरगामिनीमिशब्दाणेवभक्तिः पुत्रेपक्षउरागः भावार्थत्विन्दूइमहत्साभक्तिर्युस्मह
इभक्तिः सत्यपशुपतेरार्हशोणितार्द्रपत्वागाजिनेगजचर्मश्चजिनेचर्मह्कृतिस्तीमसमरः नत्रेक्रांहरेनिवतेय

पश्चाद्वैर्भुजतरुवनैर्मंडलैर्नाभिलीनेः सांध्यैस्तैजोविकसितजयापुष्परक्तैर्दधानैः नृत्यारंभेहरेप
शुपतेरार्द्रनागाजिनेच्छां शांतोद्वेगस्तिमितनयनेर्दृष्टभक्तिर्भवान्या ४०॥ त्वमेवतनस्यानेभवेस्मर्थैः गः
जामूरमर्दनानंतरं भगवान्महादेवस्तदीपमार्द्रां गजिनंभुजमंडलेनविधृत्तांडवंचकारेतिमसिद्धिः दृष्टभक्ति
रिकांच्यहपसिद्धिः दृशशब्दस्यास्थितापुवादित्वानापुवद्भावस्यउर्वारत्वात्श्रप्रियादिवुडतिनिवेधात्भक्तिश
ब्दस्यप्रियादिषुपाठादिति तेदतच्छाय दृष्टभक्तिरिति शब्दमाश्रित्यमतिविहितगणव्याख्यानेदृष्टभक्तिर
सोतिनपुंसकस्वपदः श्रदार्थहतिमात्रपरत्वेदृष्टशब्दोलिंगविशेषस्यानुपकारित्वात् स्त्रीत्वमेववदिविवक्षि
तभावः भोजराजस्तुभाक्तोचधमसाधनावामित्यनेनसत्रेणभज्यतेसेव्यतेइतिकामार्थत्वेभवानीभक्तिरि
सारिभवतिभवसाधनायोत्तस्थिरभक्तिर्भवान्यामित्यादिभवतीसादेतितदेतत्सर्वसम्यग्विवेचितमस्माभीरखु
वपासंजीवीसाइदृष्टभक्तिः पनिज्येइष्टमचनस्माद्दृष्टभक्तिरिसच्चापिमनमेदनपूर्वपरस्मस्त्रीत्वननपुंसकत्वनवह

२१

इत्यर्थः महाकालनाथस्य नाना सेवाप्रकारमभिधाय पुनर्नरपतिनगरसंचारप्रकारमाह गच्छन्तीनामिति तत्रो
जयिन्यां नक्तं रात्रौ रमणवसतिं प्रियभवनं प्रति गच्छन्तीनां योषितामभिसारिकाणामित्यर्थः सूचिभिर्भेद्यै
रति सांद्रैरित्यर्थः तमोभिः रुद्धालोके निरुद्धदृष्टिप्रसारे नरपतिपथे राजमार्गे कनकस्य निकषो निक
षघातरेखा सुवर्णस्य निकषोपलगतरेखावत् स्निग्धं तेजो यस्याः तया स्निग्धं तु मसृणे सांद्रे रम्ये स्त्री वेत

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः सौदामि
न्या कनकनिकषस्निग्धया दर्शयोर्वीं तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ४२ गच्छ

स्त्रियाः

तेजसीति शब्दार्णवे सुदाम्नाद्रिणा एकादिक्को दामिनी विद्युत तेन एकदिगिति अण् तया त्वमुर्वीं
मार्गं दर्शय विक्लवतो योत्सर्गस्तनिताभ्यां वृष्टिगर्जिताभ्यां मुखरः शब्दायमानः मा स्म भूः ङित स्ताः यो
षितो विक्लवा भीरवः तत्र वृष्टिगर्जितेन कातरा इत्यर्थः नात्र तोयोत्सर्गसहितं स्तनितमिति विग्रहः वि
शिष्टस्यैव केवलस्तनितस्याप्रतिषिद्धत्वात् न च द्वंद्वपक्षे अल्पाच्तरस्यैवं मिति शास्त्रविरोधः लक्षणा
हेत्वोः क्रियासमभिहारेऽत्र स्तनपदविपरीतनिर्देशेन पूर्वनिपातशास्त्रस्यानित्यत्वज्ञापनादिति ४२ ॥

मे. टी. २२

तामिति चिरं विलसनात्स्फुरणात् खिन्ना विद्युदेव कलत्रं यस्य स भवान्सुप्ताः पारावताः कलरवाय
स्यां तस्यां विटंकिकायामित्यर्थः पारावतः कलरवः कपोत इत्यमरः जनसंचारस्तत्रासंभावित एवे
तिभावः कस्यांचिद्विटंकवनस्य वलभौ वाछादने उपरिभाग इत्यर्थः आछादनं स्याद्वलभिश्छदिर्हण्णामिति
यादवः तां रात्रिं नीत्वा दृष्टे सूर्ये उदिते सतीत्यर्थः पुनरध्वशेषं वाहयेत् गमयेत् तथाहि सुहृदां

तां कस्यांचिद्विटंकवनवलभौ सुप्तपारावतायां नीत्वा रात्रिं चिर
विलसनात्खिन्नविद्युत्कलत्रः दृष्टे सूर्ये पुनरपि भवान्वाहये
दध्वशेषं मंदायंते न खलु सुहृदामभ्युपेतार्थकृत्याः ४२॥

मित्राणां अभ्युपेतार्थं अंगीकृतार्थं अर्थः प्रयोजनं सहकृत्याः क्रिया येषां ते अभ्युपेतसुहृदर्था इत्यर्थः सा
पेक्षत्वेपि गमकत्वात् समासः कृत्या क्रियादेवतयोः कार्ये स्त्री कुपिते विषे इति यादवः कृञः श चेति च
क्यप् न मंदायंते खलु न मंदा भवंति खलनं विलंबं न इत्यर्थः लोहितादिडाज्भ्यः क्यषिति क्यषु वा क

[illegible] ४२॥ २२

तस्मिन्निति तस्मिन्काले पूर्वोक्ते सूर्योदयकाले प्रणयिभिः प्रियतमैः खंडितानां योषितां नायिकाविशेषाणां
ताते नेत्रो सेगविहते खंडिते र्ष्याकषायितेति दशरूपकेन यन शरूपके नयनसलिलं शांतिं नेयं नेतव्यमत
तेरहिंकर्मकः अतोहेतो भानोर्वर्त्मामार्गमाशुशीघ्रं त्यज जहीहि स्मावरकोमाभूदिति भावः विपत्तेष्वनिष्टमाह सोपि
भानुर्नेलांम्बः बुजातिसुस्यासंतीति नलिनी पद्मिनी तस्याः बुजे नसंजातस्त्वमिति कृतेन रीत्यो निति
प्रालेयास्रं वतस्याः स्वकान्तायाः कमलस्वरूपकमेव वदनं तस्मात्प्रालेयं हिममेवास्रं हर्त्तुं प्रमार्ष्टुं

तस्मिन्काले नयनसलिलं योषितां खंडितानां शांतिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु
प्रालेयास्रं कमलवदनात्सोपि हर्तुं नलिन्याः प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ४२

प्रत्यावृत्तः प्रत्यागतः नलिन्याः प्रभर्तुं भानुर्देशांतरे वलिन्येतरगमनात् खंडितत्वमिष्याशयः ततो वत
त्वयि मेघे करान्प्रभून रुणाद्धीति कररुत् त्विमस्मिन् कररुधि सति त्वत्तो धिनि सतीति यस्मात् वलि
हस्तोगावः करा इत्यमरः अनल्पाभ्यसूयो धिकविद्वेषः स्यात् प्रायेणोर्ष्याविघातात् दोषवि
शेषस्तु कामितिभावः आरब्धाणाचार्वकसीशाने विसंवादहष्टियोनरः अयाम्वितस्य नश्यंतिरोद्ध्व
त्वभवेत् ध्रुवमिति निषेधात्कार्यहानिर्भविष्यतीति ध्वनिः ४२ रामः रामायनमः

मे॰दू॰ टी॰ २३ गंभीरायाः गंभीरायाः नाम सरितः उदरं तापिकावेति ध्वन्यते प्रसन्ने तु रतन् त्वादोषरहितेनेवेन सीव प्रसन्ने
निर्मले पयसि प्रकृत्या स्वभावेन सुभगः सुंदरः स्फुटदेहः छायाभागं काशोंडौरितेन तरवामैरडुलीच्यां चौ श्री
मति चेतसुभगा इति पाठान्तराणि वे तेन वच्छायामात्मापि प्रविशति विवृणोति रवाम प्रवेशं लप्स्यते अपि
शत्वात्प्रवेशमनिच्छोरपि विभाव तस्माच्छायाद्वारापि प्रवेशावश्यंभावित्वात् अस्याः गंभीरायाः

गंभीरायाः पयसि सरितश्चेतसीव प्रसन्ने छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशं त
स्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्यान्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि
॥ ४४ ॥

कुमुदवद्विशदानि धवलानि चटुलानि शीघ्राणि शफराणां मीनानां उद्वर्तनानि मुल्लंठितानि तानि
एव प्रेक्षितानि अवलोकनानि वा चञ्चलशीघ्रस्मितानि विभ्रमाः एतावदेव गंभीरायाः अनुरागलिं
गं धैर्याद्यान्मोघीकर्तुं विफलीकर्तुं त्वं नार्हसि नानुरक्ताविमुखवा स्यात् धनेलक्षणेन लिं
ग्रानि संदर्शितानामेकमपथ्य सुंदरः अवेक्ष्य रक्तां यत्नेन रकांधनौ विमुंचति ॥ ४४ ॥ तस्याः २३

तस्याः इति देमन्दे प्राप्तावानीरशाखावेतसशाखा येन तत्तथोक्तं अत एव किंचिद्विदीघकरधृतं तेह स्ताव
लेवितमिव स्थितं मुक्तस्त्यक्तो रोधस्तटमेव नितंबो कीदृभागो येन तत्तन् तथोक्तं नितंबः पश्चिमे
श्रोणिभागे द्विकटके कटाविति यादवः नीलं हरितवर्णं तस्याः गंभीरायाः सलिलमेव वसनं

तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं हृत्वा नीलं
सलिलवसनं मुक्तरोधोनितंबं प्रस्थानं ते कथमपि स
खे लंबमानस्य भावि ज्ञातास्वादो विवृतजघनां को विहातुं स
मर्थः ४५

नीलो वलधारणो विरहस्तापनिवारणो इति प्रसिद्धिः हृत्वापनीय लंबमानस्य पीतसलिलभारा
त्वं समानगगनाकृष्टस्य वेगमवचनेतव प्रस्थानं प्रयाणं कथमपि कृच्छ्रेण भावि कृच्छ्रे त्वदेतमाह
ज्ञातेति ज्ञातास्वादोनुभूतरसः कः पुमान् विवृतं प्रकटितं जघनं कटिस्थसम्मुखभागो वायः
स्यास्तां तथाभूतां स्पष्टं दृश्यं श्रोणिभागो पत्नो मायोरिति यादवः विहातुं त्यक्तुं समर्थो न कोपि समर्थः

त्वन्निष्यन्देन त्वद्वृष्ट्या उच्छ्वसिताया उपबृंहिताया वसुधाया भूमेर्गंधसंपर्केण रम्यः सुरभिरित्य॰
र्थः स्रोतः शब्दोनेंद्रियवाचिना तद्विशेषो घ्राणं लक्ष्यते स्रोतोनुवेगेंद्रिययोरित्यमरः स्रोतोरंध्रेषु
नासारंध्रेषु यद्ध्वनितं शब्दितं तेन सुभगं यथा तथा दंतिभिर्गजैः पीयमानो वसुधागंधलोभादा
घ्रायमाण इत्यर्थः अनेन मांद्यमुच्यते काननेषु उदुंबराणां जंतुफलानां उदुंबरो जंतुफलो यज्ञांगो हे
मदुग्धक इत्यमरः परिणमयिता परिपाकयिता मितान्निरूपस्वरूपनिह्नवः शीतो वायुः देवशब्दपूर्वं गिरिं मि

त्वन्निष्यंदोच्छ्वसितवसुधागंधसंपर्करम्यः स्रोतोरंध्रध्वनितसुभगं दंतिभिः पीयमानः नीचै
र्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते शीतो वायुः परिणमयिता काननोदुंबराणां ४६ ॥

त्यर्थः उपजिगमिषोरुपगंतुमिच्छोः गमेः सन्नंतादुप्रत्ययः ते तव नीचैः शनैर्वास्यति त्वामुपजिष्यती
त्यर्थः संबंधमात्रविवक्षायां षष्ठी देवपूर्वं गिरिं शब्दस्मननुसेनिलक्षस्यैवविशेषत्वायामेकगत
त्वाभावादवाच्यवचनदोषमाह गलेकारिकोक्तदुक्तमेकावल्यायदवाच्यस्य वचनमानतदाच्यवच॰
नमयितमिति समाधानेन देवपूर्वं विशेषणेन गिरिशब्देन शब्दपरेणमेवोपगमेनयोग्यपादेव॰
गिरिरित्युक्त इति कथंचित्संपाद्यम् ४६ ॥ मित्रदेवपूर्वं गिरिः २ २४

तद्रेतितत्रदेवगिरौनियतावसतिंर्यस्कंदंतंनियमज्विहितनियमसक्त्रिहितनियमस्यर्थः पुराकिलतारकाख्यासुरविज
यसंतुष्टसुरप्रार्थनावशाद्गंगायांभवानीनंदनः स्कंदोनियमहमिहदिशिवासंसदवसाधिमुक्तवानतस्मात्तत्रैव
सतीतियर्यसिद्धिः स्कंदंकुमारंस्वामिनंपुष्पासारैर्मेघः पुष्पमेघः पुष्पमेघीकृतात्मा कामरूपत्वात्पुष्पवर्षकमेघी
कृतविग्रहः सन्व्योमगंगाजलार्द्रैःपुष्पासारैः धारासंपातैः धारासंपात आसारेत्यमरः भवान्स्नपयतु
अभिषिंचतु स्वयंप्रजापाचउत्तमन्वादिति भावः तथाचसंभ्रमरहस्येस्नपयतजयंति वेदेवमुनमासोदूरामैः सधा
पाजयेहैरधमायाजननंविंशेयतिस्कंदस्यप्रज्यान्त्वसमर्थकमयोनरत्नस्येतिरस्तेतितन्मनगवान्कदंर्य स्थः वि

तत्रस्कंदंनियतवसतिंपुष्पमेघीकृतात्मापुष्पासारैःस्नपयतुभवान्व्योमगंगाजलार्द्रैः रक्षाहेतो
र्नवशशिभृतावासवीनांचमूना मत्यादित्यंहुतवहमुखेसंभृतंतद्धितेजः ४२

शिव

धेयप्राधान्यात्पुंसकत्वनिर्देशः वासवस्येमावासव्यस्तस्येदमित्यण्णतासांवासवीनामैंद्रीणांचमूनांसेना
नारक्षैवहेतस्तस्यरक्षाहेतोः रक्षणांकरणंनरक्षार्थमित्यर्थः षष्ठीहेतुप्रयोगे इतिषष्ठीनवशशिभृताभग
वताचंद्रशेखरेणवह्नीतिवह्निः एवायचवह्नितस्यवहो हुतवहोवह्निस्तस्यमुखेसंभृतंसंचितं आदित्यम
तिक्रांतमत्यादित्यंतत्रप्रत्यादयःक्रांताद्यर्थे द्वितीययेतिसमासः तेजोहिमांतांरुद्रगवेतात्हरस्येतत्तन्मूर्ति
तरमित्यर्थः अतएवपूज्यइतिभावः मुखग्रहणातृपदत्वसूचनार्थंतदुक्तंशंभुरहस्येगर्वाप्सुदा हिजस्वाहि

योगानांहव्यवेर्वः परेशुविनमेविधान्नुरवेस्तीव

दिकामेघदूत ४१॥

मे॰ दू॰
२५

ज्योतिरिति। ज्योतिषस्तेजसो लेखा राजयस्तासां वलयं मण्डलमस्यास्तीति ज्योतिर्लेखावलयि गलितं बर्हं।
न तु लौल्यात्स्वयं छिन्नमित्याशयः। यस्य मयूरस्य बर्हं पिच्छं बर्हं नपुंसकमित्यमरः। भवानी गौरी पुत्रप्रेम्णा
पुत्रस्नेहेन कुवलयस्य दलं पत्रं तत्प्रापि तत्संगि यथा तथा कर्णे करोति दलेन सह धारयतीत्यर्थः। यद्वा
दलप्रापि दलभाजि दलार्हे कर्णे करोति किंवतात्समर्थो दलपरिहारेण तत्स्थाने कर्णे बर्हं धत्त इत्यर्थः
नाद्यस्तु कुवलयदलं तेपि पठन्ति ते पौर्न्निर्द्दायदहरणाचेति हरशशिरुचा हरशिरश्चन्द्रिकया धौता

ज्योतिर्लेखावलयि गलितं यस्य गौरी भवानी पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ४८

पाङ्गं हरतो यौवनादिति धवलितनेत्रान्तं अपाङ्गौ नेत्रयोरन्तावित्यमरः। पावकस्याग्नेः अपत्यं पावकिः स्क
तः इति जिरन्नमन्यपः तस्य पावकेः स्कन्दस्य तं पूर्वोक्तं मयूरं पश्चात्स्नानाभिषेचनानन्तरं अद्रेर्देवगिरेः कन्द
ग्रहणेन गुहासंक्रमेण गुरुभिः प्रतिध्वानमहद्भिः गर्जितैर्नर्तयेथाः नर्त्यकारय मार्दङ्गिकभावेन भगवन्तं स्क
माराधयेति भावः। नर्तयेथा इत्यत्राणावकर्मकाच्चित्तवत्कर्तृकादित्यात्मनेपदापवादः। निगरणचल
लनार्थेभ्यश्चेति परस्मैपदं न भवति तस्य न पादम्याङ्यमपरिमुहरुचिनृतवदवसा वि प्रतिषेधात् ४८ २५

एवं।

आराध्येति। पूर्वोक्तप्रकारेण शरावाणामरण्यानि शरोवाणं इति शब्दार्णवे तेषां वणः शरवणः प्रति रतः श
रत्वमादिनाणत्वं तत्र भवो जन्म यस्य तं शरवणभवं देवं स्कंदं शरजन्मा षडाननः इत्यमरः। अवर्ण्या
बहुव्रीहिर्वाधिकरणो जन्मा पुत्तरपद इति वामनः। अगति तत्वादा सूपणो इत्यर्थः। आराध्यापा
स्य वीणाभिः वीणावद्भिः व्रीह्यादित्वादिनिः प्रत्ययः। सिद्धद्वंद्वैः सिद्धमिथुनैः भगवते स्कंदस्य अनुपः
वीणापि तु मार्गेनेरितिभावः। जलकणभयात् जलसेचकस्य वीणाक्वणनप्रतिबंधकत्वादितिभावः।

आराध्यैनं शरवणभवं देवमुल्लंघिताध्वा सिद्धद्वंद्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः। व्या
लंबेथाः सुरभितनयालंभजां मानयिष्यन् स्रोतोमूर्त्या भुवि परिणतां रंतिदेवस्य कीर्तिम्॥४५॥

मुक्तमार्गस्त्यक्तवर्त्मा सन् उल्लंघिताध्वा कियंतमप्यध्वानं गत इत्यर्थः। सुरभितनयानां गवां आलं
भेन संज्ञपनेन जातां तथोक्तां भुवि लोके स्रोतोमूर्त्या प्रवाहरूपेण परिणतां रध्याविशेषमाप
न्नां रंतिदेवस्य दशपुरपतेर्महाराजस्य कीर्तिं चर्मण्वत्याख्यां नदीमित्यर्थः। मानयिष्यन् सत्कार
यिष्यन् व्यालंबेथाः आलंबिवेतरेति अर्थः। पुराकिल राज्ञो रंतिदेवस्य गवालंभेष्वेकत्र संभृता
द्रक्तनिःस्यंदाच्चर्मराशेः काचिन्नदी सस्यंदे सा चर्मण्वतीत्याख्यायते ४५ रामः ॥

मे.दू. टी. २६ त्वयीति शार्ङ्गिणः कृष्णस्य वर्णस्य कांतेश्चोरे नत्सवर्णे इत्यर्थः त्वयि जलमादातुमवनते सति पृथुम
पि दूरभावाद्दूरत्वात्तनुं सूक्ष्मतया प्रतीयमानं तस्याः सिंधोः चर्मण्वत्याख्यायाः प्रवाहं गगने गतिः
येषां ते गगनगतयः खेचराः सिद्धगंधर्वादयः अयमपि बहुव्रीहिः पूर्ववज्जन्माद्युत्तरपदो द्रष्टव्यः

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे तस्याः सिं
धोः पृथुमपि तनुं दूरभावात्प्रवाहं प्रेक्षिष्यंते गगनगतयो
नूनमावर्ज्य दृष्टी रेकं मुक्तागुणमिव भुवः स्थूलमध्येंद्र
नीलम् ५०

नूनं सत्यं दृष्टीरावर्ज्य आनम्य एकमेकयष्टिकं स्थूलो महानमध्यो मध्यमणिर्भूत इंद्रनीलो यस्य तं भुवो
भूमेर्मुक्ताहारमिव प्रेक्षिष्यंते ग्रसंते नीलमेघसंगतस्य प्रवाहस्य भूकंठगतमुक्तागुणत्वेनोत्प्रेक्षणा
दुत्प्रेक्षैवेयमिति रूपणाद्ध्वन्यते निरूपककारस्तु तत्रोपमायामिव दर्शनादृष्टापुपमैवेति वक्ष्याम ५० २६

तामिति तां चर्मण्वतीमुत्तीर्य भवांल्लता भ्रूपभ्रूलता भ्रूपमिता सामासः तासां विभ्रमाः विलासाः
परिचिताः स्मा भ्रूलता विभ्रमा येषु तेषां पक्ष्माणि नेत्रलोमानि पक्ष्मापो किंजल्के नेत्रलोमनी
ति शाश्वतः तेषामुत्क्षेपादुत्क्षमनाद्धेतोः कृष्णाश्वताः शास्त्रकृष्णसाराः नीला शबलाः वर्णावर्णेने
ति मुमासः कृष्णसारकसिताः शारशुतियारवः ततः शारमाल्हादेव सिद्धिः कास्येपुनः कृष्णशावाद्योपा
दाने कालस्याधान्यार्थे रक्तत्वेच्छेतनस्यनविवर्गस्तेन तनुपमानसारात् तस्यस्वाभाविकस्य स्त्रीवेत्रेषुसा

नदी तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णसारप्रभाणां
कुंदक्षेपानुगमधुकरश्रीमुषामात्मबिंबं पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानां ॥

मुद्रिकविरोधारितस्यापसेगानकविन्यद्राक्यानेउपांतविषयेउपरिविलसंतः कृष्णसाराः
प्रभाः येषां तेषां कुंदानि माघ्यकुसुमानि माघ्यंकुंदमित्यमरः तेषां क्षेपः उत्क्षेपणं तस्यानु
गाः अनुसारिणः ये मधुकराः तेषां श्रियं मुष्णंतीति तानि नेत्रयोः कौतूहलानि कृतूहलानि तेषां पात्राणि तत्पात्रमात्रे तस्य स्त्री वेत्यमरः
णिमधुकरस्वकल्यानामभिमर्षः दशपुरं रतिदेवनगरं तत्रवधूः स्त्रियः वधूर्जायापास्तुपास्त्रीचेत्यमरः
तासां नेत्रकौतूहलानां नेत्राभिलाषाणामभिलाषाःदृष्टीनामभिमर्षः आत्मबिंबं समृतिपात्रीः

५४ मेघदूतटीका

मे॰ टी॰ २२

ब्रह्मावर्तमिति अत्र मनुः सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरं तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षत इति अथा
नन्तरं ब्रह्मावर्तं नाम जनपदं देशं छायया अनातपमण्डलेन गाहमानः प्रविशन्न तु स्वस्वरूपेणापीडन्नेत्याश्र
मादीनि परिहरत्यान्यतो व्रजेदिति वचनादिति भावः तत्र प्रधनपिशुनं अद्यापि शिरःकपालादिभिस्तथा
कुरुपाण्डवयुद्धसूचकमित्यर्थः युद्धमायोधनं जन्यं प्रधनं प्रविदारणमित्यमरः तत्त्यासिदं कुरूणामि

कुरुक्षेत्रंनाम

त्वं

ब्रह्मावर्तं जनपदमथ छायया गाहमानः क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः राज
न्यानां शितशरशतैर्यत्र गाण्डीवधन्वा धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ५२

दं कौरवं क्षेत्रं भजेथाः कुरुक्षेत्रं भजेत्यर्थः यत्र कुरुक्षेत्रे गाण्डीवं धनुः विशेषः गाण्ड्यजगात्संज्ञायामिति म
त्वर्थीयो वप्रत्ययः अर्जुनस्य तु गाण्डीवं नपुंसकमित्यमरः गाण्डीवमिति धनुर्यस्य गाण्डीवधन्वा अर्जुनः
वा संज्ञायामित्यनङादेशः शतशरपातैर्निशितबाणसहस्रैः राजन्यानां राज्ञां मुखानि धारासा
रुदकधारासंपातैः कमलानि त्वमिवाभ्यवर्षत् अभिमुखहस्वान्यासवर्षेण शिरांसि चिच्छेदेत्यर्थः ५२ २२

हित्वेति बंधुप्रीत्या कुरुपांडवस्नेहेन न तु भयेन समरविमुखो युद्धनिःस्पृहः लांगलमस्यास्तीति लां
गली हलधरः अभिमतरसामभीष्टस्वादां तयोरेकस्याः स्वप्रियायाः ककुद्मिकन्यायाः लोचने एवांकं
प्रतिबिंबत्वाच्चिह्नं यस्यास्तां हालां मद्यं रामस्य हलिप्रियालेसमर अभिप्रयुक्ते देशभाषापदमित्यत्र सू
त्रे हालेति देशभाषापदं न ष्यती वक विप्रयोगात् सार्द्धं मधुदानं हारस्वामनः हित्वा त्यक्त्वा बुसत्जामपी
तिभावः याः सारस्वतीरपः सिषेवे हे सौम्य भगवंस्तासां सारस्वतीनां सरस्वत्याः इमाः सारस्वत्यस्ता

हित्वा हालामभिमतरसां रेवतीलोचनांकां बंधुप्रीत्या समरविमुखो लांगली याः सिषेवे कृ
त्वा तासामभिगममपां सौम्य सारस्वतीनां मंतः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ५२

सामयामभिगमं सेवनं कृत्वा अंतरंतरात्मनि शुद्धो निर्मलो निर्दोषो भविता रावुलट्चावितिभ्रव
अत्रिसमयवमतो भविष्यतीत्यर्थः वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमाने प्रत्ययः वर्णमात्रे
ण वर्णेनैव कृष्णः श्यामः न तु पापेनेत्यर्थः अंतःशुद्धिरेव संपाद्या न तु बाह्या वहिः शुद्धोपि स्नात
वधप्रायश्चित्तार्थं सारस्वतसलिलसेवी तत्र भगवान्बलभद्र एव निदर्शनं अतो भवतापि सर
ती सेव्या सेवितव्येति भावः ५२ ॥ रामायनमः ॥

तस्मादिति तस्मात्सरस्वतीप्रदेशात्कुरुक्षेत्रात्कनखलस्याद्रेः समीपेऽनुकनखलं अनुर्यत्समयेत्यव
यीभावः शैलराजात्हिमवतोऽवतीर्णां सगरतनयानां स्वर्गसोपानपंक्तिं स्वर्गप्राप्तिसाधनभूतामि
त्यर्थः जह्नोर्नाम राज्ञः कन्यां जाह्नवीं गंगां गच्छेर्गच्छ विध्यर्थे लिङ् या जाह्नवी गौर्याः वक्त्रे या भ्रुकुटि
रचनां सापत्न्यरोषाद्भ्रूभंगकरणं तां फेनैर्विहस्येव हसित्वेव धावल्यात्फेनानां हासत्वेनोत्प्रेक्षिता

स्थानात्

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां जह्नोः कन्यां सगरतनयस्वर्गसोपानपंक्तिं।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः शंभोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता॥
गंगा ५४

इन्दौ शिरोमाणिक्यभूते लग्ना ऊर्मय एव हस्ता यस्याः सा इन्दुलग्नोर्मिहस्ता सती शंभोः केश
ग्रहणमकरोत् यथा काचित्प्रौढा नायिका सपत्नीमसहमाना भर्तारं सुहस्तिरोरत्नेन
केशेष्वाकर्षति तद्वदिति भावः इदं पुरा किल भगीरथप्रार्थनया[illegible]वतो गगनपथात्प
तन्तीं गंगां गंगाधरो जटाजूटेन जग्राहेति कथामुपजीव्योक्तम् ५४ रामायनमः॥ २८

तस्या इति सुरराजइव दिग्गजइव व्याप्ति पश्चाद्देहे पश्चामाङ्गे मितमुर्थः इषोदराद्दित्वात्साधुः तेनः
लेवनइति पश्चाद्देलेवी सन्तू पश्चाद्देभागेनव्याप्तिस्थित्वा पूर्वार्द्धेन जलोन्मुख इसर्थः केविस्तृ
र्वार्द्धे लेवीति पठंति अच्छस्फटिकाविशदं निर्मलस्फटिकावदातं तस्याः गंगायाः अंभसि यं

तस्याः पार्श्वे सुरराजइव व्याप्ति पूर्वार्द्धे लेवी त्वंचे दच्छस्फटि
क विशदं तर्कयेस्तिर्यगंभः तेसरस्या सपदि भवतः स्रोत
सिछाययासौ स्यादस्थानोपगतयमुनासंगमेवाभिरामाः ॥ ५५
नो संगम

क. तिर्यक्षीनं पद्यातया पातं त्वं तर्कयेविचारयेः स्त्रोतस्यपदि स्त्रोतसि प्रवाहे संसर्पन्त्या संक्रामंत्या भवतः
छायया प्रतिबिंबेन असौ गंगा स्थाने अप्रयागादन्यत्रोपगतः आस्नो यमुनासंगमो यया सा तथाभूतेवाभिरा

मे॰ दू॰ टी॰ २८

आसीनानामिति आसीनानामुपविष्टानांमृगाणांकस्तूरिकामृगाणांयस्यानाभिगंधानुपपतेः
नाभिगंधैः कस्तूरीगंधैः तेषांतदुद्भवत्वात् अतएवमृगनाभिसंज्ञाचमृगनाभिर्मृगमदः कस्तूरी॰
त्यमरः अथवानाभयः कस्तूर्यः नाभिःप्रधानेकस्तूर्यांमेदिन्यांविलीरितइति विश्वः तासांगंधैःसु
रभिताः सुरभीकृताः शिलायस्यतंतस्यागंगायाएवप्रभवंप्रसूतिप्रभावंकारणंतुषारैःआ

आसीनानांसुरभितशिलंनाभिगंधैर्मृगाणां तस्याएवप्रभवमचलंप्राप्यगौरंतुषारैः वक्ष्य॰
स्यध्वश्रमविन[य]नेतस्यशृंगेनिषण्णः शोभांशुभ्रांत्रिनयनवृषोत्खातपंकोपमेयाम् ५६ ॥

लेपैः गौरंसितं अवदातः सितोगौरइत्यमरः अचलंप्राप्यविनियतेः नेनेतिविनयनेकरणेल्युट्॰
अध्वश्रमस्यविनयतेःपतोदकेतस्यहिमाद्रेःशृंगेनिषण्णःसन् शुभ्रांत्रिनयनस्यत्र्यंबक॰
स्यवृषोवृषभः सुकृतेवृषभेवृषइत्यमरः तेनोत्खातेनविदारितेनपंकेनसहोपमेयामुपमा
तुमर्हांशोभांवक्ष्यसिवोढासिवहतेर्लृट् त्रिनयनेस्यत्र्यंबकपदात्संज्ञायांसमजनिपात्वेनभवा॰
तिन्नाभ्यादिष्वेतिनिषेधात्तस्याःप्रभवमित्यादिना हिमाद्रेर्मेघस्यैवाहिकोगृहविहारोध्व

श्री हरि २८

तमिति वायौ वनवाते सरति वाति सति सरलानां देवदारुद्रुमाणां स्कंधप्रदेशविशेषाः अस्त्री प्रकांडः स्कं
धः स्यान्मूलाच्छाखावधेस्तरोः इत्यमरः तेषां संघट्टेन संघर्षणेन जन्म यस्य स तथोक्तः जन्मोत्तरपदत्वाद्व्यधिक
रणोपि बहुव्रीहिः साधुरित्युक्तं उल्काभिः स्फुलिंगैः क्षपिता निर्दग्धः चमरीणां वालभारो केशसमूहो येन सः

तं चेद्वायौ सरति सरलस्कंधसंघट्टजन्मा बाधेतोल्काक्षपित
चमरीवालभारो दवाग्निः अर्हस्येनं शमयितुमलं वारि
धारासहस्रैः आपन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानां ५५

दवरूपमग्निः दवे वाग्निः दवाग्निः वनवह्निः वने च वनवह्नौ च दवो दाव इत्युभयत्रेति यादवः तं हिमा
द्रिं बाधेत चेत् पीडयेत् यद्यपि न दवाग्निः वारिधारासहस्रैः शमयितुमर्हसि युक्तश्चैनत् इत्याह उत्त
मानां महतां संपदः समृद्धय आपन्नानामार्तानामर्तिप्रशमनमापत्तिनिवारणमेव प्रयोजनं
येषां तास्तथोक्ता हि अतो हिमाचलस्य दावानलस्त्वया शमयितव्य इति भाव ५५ रामः ॥

मे.दू. टी. ३०

यइति तस्मिन्हिमाद्रौ संरंभः कोपः संभ्रमे कोपे इति शाश्वतः तेनोत्पतने उत्प्लवने रभसो वेगो येषां ते तथोक्ताः रभसो वे-
गहर्षयोरिति विश्वः ये शरभाः अष्टापदमृगविशेषः शरभः शलभे वाष्टापदे प्रोक्तो मृगान्तरे इति विश्वः मुक्ताध्वा-
रंभोत्पतनमार्गो येन तं भवंतं सपदि स्वांगभंगाय पलंघयेयुः संभावनायां लिङ् भवतोतिदूरत्वात्स्वांगभंगातिरिं-
क्तं फलेनास्ति लंघनस्य सामर्थ्यं तान्शरभान्तुमुलाः संकुलाः संकरकावर्षोपलाः वर्षोपलस्तु करकेत्यमरः ता-
सां वृष्टिः सा तस्याः पातेनावकीर्णान् विक्षिप्तान् कुर्वीथाः कुरु इत्यर्थः विध्यर्थे लिङ् तद्वाप्यधिक्षिपन्निति फलः सथ-
मपि हे मध्य इति भावः तथाहि आरभ्यत इत्यारंभः कर्माणि तेषु यो यत्नः उद्योगः सः निःफलो येषां ते तथोक्ताः

ये संरंभोत्पतनरभसाः स्वांगभंगाय तस्मिन् मुक्ताध्वानं सपदि शरभाः लंघयेयुर्भवंतं तान्कुर्वीथास्तु-
मुलकरकावृष्टिपातावकीर्णान्के वा न स्युः परिभवपदं निःफलारंभयत्नाः ५८ ॥ राम ॥

निःफलकर्मोपक्रमा इत्यर्थः अतः के वा परिभवपदं तिरस्कारपदं न स्युः न भवंत्येवेत्यर्थः यदत्र चनोपल-
स्तु करका इति पाठवचनात् करकशब्दस्य नियत पुंलिंगताभिप्रायेण करकाणामाहृष्टिरिति केषांचिद्व्या-
ख्यानं तत् न्यूनानुमन्यंते वर्षोपलस्तु करकेत्यमरः वचनव्याख्याने हीनस्वामिना कमंडलौ च कारकः स्त्रियां
तेच विज्ञायके इति नानार्थश्रुत्यापि वद्यतीति वदता उभयलिंगताप्रकाशनात् पादवसनु पुंलिंगताविधा-
नेनामर्थं नतु स्त्रीलिंगतानिषेधः इति ननु हि तयोपि वररुच स्त्वकरभस्यादाकोशे चक मंडलोपतिंमेदकरे
वाभिव करकान्तु वर्नोपल इति विश्वप्रकाशे वचनेन तु भयलिंगताव्यक्ते वेति न कुत्रापि विरोधवार्तावतपवर

२१ टी. ३०

नवेति नवरहिमाद्दौ रथदिकसौ विछिन्नायां व्यक्तं प्रकटं शास्वस्तदा सिद्धो यो गिमि: सिनिष्यमथो गिनो रितिविश:
उपवित नवलिंपरिवित पजे वलिशज्ञोपहार योरितियादव: अर्हस्रा माविडखेति अर्हे ड: खडे समेयोर्हसि
तिस्व: सिने पाकल खडे वा खडे वाप्रसद्दोई समेपाके उत्पमर: समोलोयस्पतस्याहे डमोलेरी स्वरस्वशरण
नामे भक्ति: प्रज्येषनुराग: तयानम्र: मन्यरीया: मदत्तिणां कृत्पपरिश्वी दिणधातोर्लिड्: यस्मिन्यादन्यासेह
हेमनि उद्धृतपापा: निरस्तसमस्तकल्मषा: सत: श्रद्धाना: विश्वसंत: पुरुष: श्रद्धाविश्वासस्यात्मिकाबुद्धिरि ३४

नवव्यक्तं रूपाद्विवरणान्या समं हैं डमोले: शास्वासिद्धैः रूपरहतवलिं भक्तिनम्र: परीयं: यस्मिन्तहेखेक
रणाविरामार्हद्धेनुद्धृतपायां: कल्पपदैनेस्थिरगणायदस्मानयेश्रद्धधाना: ५५ गम: ॥

वियावत अदंनरोहपमगैवहतिर्वत व्येति श्रुत श्रद्धधाने: शानुवकरणास्पगात्रस्पविगमात् उर्ध्वे देहस्या
गामरभिमर्थ: करणं साधकतमं देवगावै ड्रियेषुचेत्यमर: स्थिरं शास्वतं यत्तगरणानां प्रथमानोपदेस्याने
गणा: प्रथमं संख्यावाचनरू तिवेज यं मीनस्पमा मत्येक सिध्यंते भापपिध्यंती मध्ये: रूपे: पर्यागिमवचनस्यालमध्ये
त्वानयोर्गनम: स्वलोस्यादिनाचतुर्थी अलमिति पर्याप्त्यर्थवचनं यद्गणमितिभाष्यकार: अथवातेव्यंजया माश्रिव:
श्रीवरहदयेहिमाद्दौ शंभवादीनां सिद्धये मर्वकमंगणाः रह्दा श्रीचरणं समकुसाधक: स्थितयेतन्नरकाधीनपारीरोहि विवरे

मे॰ टी॰ ३१

शब्दायंत इति हे मेघ अनिलैः पूर्यमाणाः ध्मायमाना कीचकाः वेणुविशेषः वेणवः कीचकास्ते स्युर्ये स्वनंत्य
विलोद्धताः इत्यमरः मधुरं श्रुतिसुखं यथा भवति तथा शब्दायंते शब्दं कुर्वंति स्वनंतीत्यर्थः शब्दवैर
कलहाभ्रकण्वमेघेभ्यः करणे इति वा उ अनेन वषावायसंपाति हक्ता संसक्ताभिर्भक्ताभिर्वशावा
यानुषक्ताभिर्वा संरक्ताभिरिति पाठे सरक्तकंठीभिरित्यर्थः किन्नरीभिः किन्नरस्त्रीभिस्त्रयाणां पुरा
णां समाहारस्त्रिपुरं तद्धितार्थेनादिना समाहारसमासः पात्रादित्वान्नपुंसकत्वं तस्य विजयो गीय

शब्दायंते मधुरमनिलैः कीचकाः पूर्यमाणाः संरक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः नि
र्ह्रादी ते मुरज इव चेत्कंदरेषु ध्वनिः स्यात् संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ६० ॥

ते कंदरीषु दरीषु कंदरो वा स्त्री इत्यमरः तेन तव निर्ह्रादो रजे वाद्यभेदे ध्वनिरिति वमुरजध्वनिरिवेत्यर्थः स्याच्चेत्
हि तत्र चरणसमीपे पशुपतेस्त्रिमहितस्य शिवस्यान्तरयत इति शेषः संततं गीते तौर्यत्रिके संगीते स
म्यगीतेनाधारेभे प्रसिद्धवत्त्रयाणां त्रितये चेति शब्दार्णवात् देवार्थः संगीतार्थः संगीतवस्त्व
र्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः समग्रः संपूर्णो भावी ननु भविष्यति गम्यादय इति भविष्य

मेघटी॰ ३१

प्रालेयेति प्रालेयाद्रेर्हिमाद्रेरुपतटं तटसमीपे अव्ययं विभक्तीत्यादिना समीपार्थेऽव्ययीभावः तांस्तान् वी-
क्षायाहिताँतिः विशेषान् द्रष्टव्यार्थान् विशेषांव सर्वे द्रष्टव्याद्रष्टव्यान्तमत्तनीतिप्राप्त्वाणांवे अतिक्रम्य दर्श-
दर्शमतोत्यर्थः गच्छेरिति नागतेन संबंधः हंसानां द्वारं हंसद्वारं मानसगमनस्यायिनो हंसाः क्रौञ्चरंध्रेण सं-
चरंतइत्यागमः भृगुपतेर्जामदग्न्यस्य यशोवर्त्म यशः प्रवृत्तिकारणमित्यर्थः यत् क्रौञ्चस्याद्रेः रंध्रम-
स्ति तेन क्रौञ्चबिलेन बलेर्दैत्यस्य नियमने बंधने अभ्युद्यतस्य प्रवृत्तस्य विष्णोर्व्यापकस्य भगवतस्त्रिवि-

मार्गेण

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान् हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरंध्रं तेनो-
दीचींदिशमनुसरेस्तिर्यगायामशोभी श्यामःपादोबलिनियमनाभ्युद्यतस्येवविष्णोः ६१ ॥

विक्रमस्य श्यामः कृष्णवर्णः पाद इव तिर्यगायामेन दैर्घ्यप्रवेशनार्थं तिरश्चीनदैर्घ्येण शोभत इति तिर्यगा-
यामशोभी सन् तेनाच्छिद्रेणेति निः उदीचीं दिशं उत्तरां अनुसरेरनुगच्छ पुरा किल भगवतो देवात् धूर्जटेर्धनुरु-
पनिषदमधीयता भृगुनंदनेन स्कंदस्पर्द्धया क्रौञ्चशिखरिणमतिनिशितविशिखमुखेन हेलपाटमि-
दुर्भेदंभित्वाततवक्रौञ्चक्रीडादिवसघः समुत्पन्नमिति कस्मिन्नपि यशः तीरनिधौ निखिलमपि जग-
जालमाप्लावितमिति कथा श्रूयते ६२

मे॰दू॰ गतेति क्रौंचविलनिर्गमनानंतरं ऊर्ध्वं च गत्वा दशमुखरावणस्य भुजैरुच्छ्वासिता विश्लेषित प्रस्थानां सा॰
टी॰ न्धीनां संधयो यस्य तस्य एतेन नयनकौतुकसद्भाव उक्तः त्रिदशा परिमाणमेषामिति त्रिदशाः संख्य
३२ येनाद्दिना बहुव्रीहिः बहुव्रीहौ संख्येये डजबहुगणादित्यादिना समासांतो डजिति क्षीरस्वामी त्रि॰
दशानां देवानां वनितानामादर्पणस्य स्फटिकत्वादुज्ज्वलत्वाद्वा बिंबग्राहित्वेनेदमुक्तं कैलास॰

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः कैलासस्य त्रि-
दशवनितादर्पणस्यातिथिः स्याः शृंगोच्छ्रायैः कुमुदविशदैर् उज्ज्वलैः
यो वितत्य स्थितः खं राशीभूतः प्रतिदिनमिव त्र्यंबकस्याट्टहा-
सः ॥

अभिव्याप्य

स्यातिथिः स्याः यः कैलासः कुमुदविशदैः शृंगाणामुच्छ्रायैरौन्नत्यैः खमाकाशं वितत्य व्याप्य प्र॰
तिदिनं दिने दिने राशीभूतस्त्र्यंबकस्य त्रिलोचनस्याट्टहासो ऽतिशायितहासस्त इव स्थितः अट्टहव॰
निशयदोमाविति यादवः धावल्यादट्टहासत्वेनोत्प्रेक्षा हासादीनां धावल्यं कविसमयसिद्धम् ६२ ३२

उत्पश्यामीति स्निग्धं मसृणं भिन्नं मर्दितं यदञ्जनं तस्येव आभा यस्य तस्मिन् त्वयि तटगते सानुगते सति सद्यः कृत्तस्य
द्विरददशनस्य छेदं तस्य छेद इव गौरस्य धवलस्य तस्याद्रेः कैलासस्य मेचके श्यामले कालश्यामले मेचके
श्यामले कालश्यामल मेचकाः इत्यमरः वाससीव स्कंधन्यस्ते सति हलभृतो बलभद्रस्येव स्तिमिताभ्यां नेत्रा
भ्यां प्रेक्षणीयां शोभां भवित्रीं भाविनीं उत्पश्यामि शोभामतिशयिनीमिति तर्कयामीत्यर्थः अत्रोत्प्रेक्षालंकारः ६३ हि
त्वेति तस्मिन् क्रीडाशैले कैलासे कैलासकाननकादिस्थमंदरोगंधरागंधमादनः क्रीडार्थं निर्मिताः शैलाः क्रीडाद्रे

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य शोभामद्रेः स्ति
मितनयनप्रेक्षणीयां भवित्रीं अंसन्यस्ते सति हलभृतो मेचके वाससीव ६३ तस्मिन् हित्वा भुजगवलयं
शंभुना दत्तहस्ता क्रीडाशैले यदि च विचरेत्पादचारेण गौरी भंगीभक्त्या विरचितवपुः स्तंभितांतर्जलौघः
(सोपानत्वं कुरु मणितटारोहणायाग्रयायी ६४

वैः क्रीडाद्रयोमवन्निति शाम्भुरहस्ये शम्भुना शिवेन भु(
जगवलयं कंकणं हित्वा गौर्यर्थं भीरुत्वात्सकाद्दत्तहस्ता अवलंबितहस्ता सती गौरी पादचारेण विहरे
द्यदि तर्हि अग्रयायी पुरोगतः तथास्तंभितोन्तर्जलौघो भावमापितो न्तर्जलैस्यौघः प्रवाहो यस्य स तथाभूतं
भंगीनां भक्त्या रचनया विरचितवपुः कल्पितशरीरः सन्मणीनां तटं मणितटं तस्यारोहणाय सोपानत्वं कुरु

२ मे० रामरामरामराम

मे॰दू॰
टी॰
३२

तत्रेति तत्रकैलासेऽत्रावश्यंसर्वथासुरयुवतयोवलयकुलिशानिकंकरकोटयः शातकोटिवाचिनाऽ
लिशशब्देनकोटिमात्रंलक्ष्यतेतैरुद्घट्टनानिप्रहारास्तैरुद्गीर्णंमुक्तस्रुतंतोयंयेनतेनत्वांयंत्रेषुधाराः
यंत्रधारास्तासांगृहत्वंकृत्रिमधारागृहत्वंनेष्यन्तिप्रापयिष्यन्तिहेसखेतर्हिमित्रघर्मेनिदाघेलब्ध
स्यघर्मलब्धस्यतवचास्यदेवभूमिषुसर्वदासर्वर्त्तुसमाहारात्ग्रीष्मिकमेघत्वाद्वायद्योतस्माषा

तत्रावश्यंवलयकुलिशोद्घट्टनोद्गीर्णतोयं नेष्यन्तित्वांसुरयु
वतयोयंत्रधारागृहत्वं ताभ्योमोक्षस्तवयदिसखेघर्मलब्धस्य
नस्यात् क्रीडालोलाःश्रवणपरुषैर्गर्जितैर्भीषयेस्ताः ६५ मे॰

ढस्यप्रथमदिवसेमेघंददर्शेतितवताभ्यःसुरयुवतिभ्योमोक्षोनस्यायदितदाक्रीडालोलाःक्रीडास
क्ताःश्रमतात्पर्याःताःसुरयुवतीःश्रवणपरुषैःकर्णकटुभिर्गर्जितैर्वंरवैःभीषयेस्त्रासयेःअत्रहेतु
भयाभावादभीस्योर्हेतुभयपरस्यनेतात्मनेपदेनापिभीषीहेतुभयेषुगित्यनेनषुगागमः ६५ ३२

हे मेघेति। हे जलद हे मेघ हेमांभोजानां प्रसवि जनकं निर्गच्छदित्यादिना उत्प्रत्ययः मानसस्य सरसः सलिलमाददा
नः पिबन्नित्यर्थः ऐरावतस्येंद्रगजस्य कामचारित्वाद्दाशिवसेवार्थं मिह्रागमनाद्वा समागतस्येति भावः क्षण
मानसजलादानकाले मुखपटेन या प्रीतिस्तां कुर्वन् तथा कल्पद्रुमाणां किसलयानि पल्लवभूतान्यंशुकानि सूक्ष्म
वस्त्राणि नीरौ प्रसूकं वस्त्रमात्रे स्यात्परिधानेन नीरीययोः सूक्ष्मवस्त्रेनाविदीनां विगति शब्दार्णवे वातैर्मेघवातैर्धुन्व

हेमांभोजप्रसवि सलिलं मानसस्याददानः कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य।
धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातैः नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेंद्रं ॥ ६६ ॥
ल

न्नानावहुविधाश्चेष्टा स्तोयपानादयो येषु तैः क्रीडितैः नाभावभेदे स्त्रीत्वमललितं त्रिषु स्त्वंदरे स्यात्स्त्रियोम
मद्दागारे क्रीडितेजान पल्लवे इति शब्दार्णवे तं नगेंद्रं कैलासं कामा यथेष्टं निर्विशोषः समुपभुंक्ष्वनिर्वे
शो भृतिभोगयोर्विसमरः यथेच्छाविहारो मित्रगृहे शुभ्रस्याः फलं सहजमित्रं चतेकैलासः मेघपर्वतः
यो अच्छ्रमणं त्वं चोत्र्याच्चिंवद्रयोपिविजीमूतयोः समीराग्रो इत्यिरमयोः मित्रमास्यमिति दर्शनादिति मे. टी. ५५

मे. दू.
टी.
६८

तस्येति प्रणयिनः प्रियतमस्येव तस्य कैलासस्योत्संगेऽङ्के गंगैव दुकूलं गोमुक्तसंगे सा विस्यस्तध्वस्तलेपि चेवि मालतीमाला
यां गंगादुकूलां स्रस्तं वस्त्रमिवेत्युपमितसमासः दुकूले लस्त्रवत्सा उन्नीयेपिता पुकः इति शब्दार्णवे कामिन्यांतु गो
वद्दुकूलं तत्र संनिधिस्यास्तामिति अलकां मलकांतु वेरनगरीः दृष्ट्वा कामिनीमिव विशेषः हे कामचारिन् त्वं पुनस्त्वं नतु
ज्ञास्यसे नावगमिष्यसे इति न किंतु ज्ञास्यसे एवेत्यर्थः कामचारिणस्ते सर्वमपि वक्तुं शक्यत्वाद्दर्शनसंभवदविज्ञाने
संभावितमेवेति निश्चयार्थेन नञ्द्वयप्रयोगः नञ्द्वयं सिद्धार्थं न दृष्ट्वा न प्रयोगः इति उच्चैर्विमानाः उन्नताः
सप्तभूमिकभवनानि विमानाः स्त्री देवयानि सप्तभूमो चमयनीति यादवः तानि यस्यां सा मेघवदनस्यान

तस्योत्संगे प्रणयिन इव स्रस्तगंगादुकूलां न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्। या वः काले व
हति सलिलोद्गारमुच्चैर्विमाना मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृंदं ६३ इत्य मेघदूतव्याख्या
ने पूर्वमेघः १॥

स्वचनार्थमिदं विशेषणं अन्यत्र विमाना विरा तमानानिरकोपायाश्चालकायां पुष्पाके कोः
लेमेघवकाले इत्यर्थः अलकमित्यर्थः अपधहृदमेघवक्रे कामिनीस्त्री मुक्ताजाले मौक्तिकसारे ग्रथितेश्ममते
पुष्पस्त्यामेतिके मुक्ते इति यादवः अलकमिव चूर्णकुंतलानीव जातौ एकवचनं अलकाचूर्णकुंतलाः स्युरमरः
वहति विभर्ति अत्र कैलासस्यानुकूलनायकत्वमलकायाश्च स्वाधीनपतिकाख्यानायिकात्वं ध्वन्यते एवं
पत्नीकोनुकूलः स्यादिति प्रियोपलालितानित्यं स्वाधीनपतिकामता इति लक्षणाद् इति वल्लालपक्षमलकां
प्रोतानुरक्तवच्चमेजवीरानोविनोदयेत्कोनत्क्षायावदनुवर्ततेनश्चि ६३ इति श्रीमहोपाध्यायमल्लिनाथसूरिवि
रचितायां मेघसंदेशव्याख्यायां संजीविन्यां पूर्वमेघः १

कालस्य सर्वसाधारणत्वात्ति वक्तव्ये नं सलिलमुद्गिरंतीति सलिलोद्गारः स्त्रवत्सलिलधारमित्यर्थः ५

विद्युत्वंतमितिपञ्चलकाख्यं ललितरम्यावनिताः स्त्रियो येषु ते स इह चित्रैर्वर्तंत इति सचित्राः आश्चर्यालेख्ये यः
ष्यो श्चित्रमित्यमरः। तेन सेंद्रचापेन तुल्ययोगाइति बहुव्रीहिः वोपसर्जनस्येति सहशब्दस्य सभावः। संगीताय
तौर्यत्रिकाय प्रहतमुरजा आहताः मृदंगा मुरजस्मृदंगे स्यादित्यमरः मुरजयोरुपमानेशब्दा गांभीर्यमणिमयविका
रा भुवो येषु ते अभ्रंलिहंतीति अभ्रंलिहानि अभ्रंकषाणि वहाभ्रे लिहः इति खश्प्रत्ययः अरुर्द्विषदाद्यन्तस्य मुमा
गमः। अभ्रंलिहान्यग्राणि शिखराणि येषां ते तथोक्ताः अतितुंगा इत्यर्थः। प्रासादाः देवगृहाणि प्रासादो

विद्युत्वंतं ललितवनिताः सेंद्रचापं सचित्राः संगीताय प्रहतमुरजाः स्निग्धगंभीरघोषं अंत
स्तोयं मणिमयभुवस्तुंगमभ्रंलिहाग्राः प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ६८ ॥

देवभूभुजामित्यमरः। विद्युत्त्वान्स्तनयित्नुरिति विद्युत्वंतं सेंद्रचापवंतं स्निग्धं आर्द्रं गंभीरघोषो गर्जितध्व
निर्यस्य तं अंतर्गततोयं यस्य तं तुंगमुन्नतं त्वां तैस्तैर्विशेषैर्ललितवनितात्वादिधर्मैः करणैः तुलयि
तुं सम्यक्तुलयितुं तुलाशब्दात् तत्करोतीति णिच् ततस्तुमुन्प्रत्ययः। अलं पर्याप्ताः। अलं भूषणपर्याप्तिशक्तिवार
णवाचकमित्यमरः। अत्रोपमानोपमेययोः भूत मेघप्रासादधर्माणां विद्युद्वनितादीनां यथासंख्यम
न्योन्यसादृश्यान्मेघप्रासादसादृश्यमिति विवक्षितं तेनैव च उपमा पूर्णा ६८ यामः

सेऽयमिति सर्वदा सर्वर्त्तुसंततिमाह हसन्निति एतालकायां वधूनां सीमान्तदेशे लीलार्थं कमलं लीलार्थं कमलं लीलाकम
लं धारयन्ति मन्दमन्दमनदृश्यत इति सर्वर्तुचर्या चलकेऽक्षुलले नामैकवचनेऽलकेऽपि सुदर्शनं वालकेऽक्षुदेः समयस्य वसन्तस
मे वासन्तविह्रमनुवेधो यस्य तेन कुसुमेन भावेन तः यद्यपि कुन्दानां शिशिरे त्वमस्ति मालाभूतः इति मिथ्यानार्थे तथा
पि हेमन्ते प्रादुर्भावः शिशिरे माद्यत्वमिति व्यवस्था भेदः नेहमेतत्कार्यत्वमित्यापि श्येत् न वा लविशेषणान्यलकमि
ति श्यमानपाठे समस्ते मस्वा म भंगः स्यात् नाथस्तु इति यतश्च लिंगनादाक्षिप्तेति दोषान्तरमाह हन्त इदं समस्तभाववः
क्रा एव लकाभिनामा सानि लीलानास्तलकानां लिनम्बः स्कन्ततोरणः स्वरितश्यादि षु प्रयोगेषु नपुंसकलिंगनादर्शनादि

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः चूडापाशे नवकुरब
कं चारु कर्णे शिरीषं सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनां ६५ इति आननेमुखे लोध्रप्रसवानां लोध्रपुष्पा

णां रेणोः शिरांसां रजसा पराग्गेण स्पाण्डुत्वा देपलेपुच्छे प्रसवो गर्भमोचनम् इत्यमरः पाण्डुतां नीताश्रीः शोभा चूडापा
शे केशपाशे नवकुरवकं कुरवकं वासन्तः पुष्पविशेषः कर्णे चारु पेशलं शिरीषं ग्रैष्मं पुष्पविशेषः सीमन्ते मस्तककेश
वीथ्यां सीमन्तस्त्रियां मस्तके शवीथ्याम् इत्यमरः मितिश च्छ्री वेनवो पगमस्त्वदुपगमः मेघागमः तदुत्पन्नं तत्र जा
तेन त्वदुपगमजेन वार्षिकमित्यर्थः नीपं कदम्बं समेस सर्वऋतूनां तिशेषः अस्तिभवतिपरः प्रथमपुरुषोऽप्रयुज्यमा
नोऽप्यस्तीति स्यायात् इत्यं कमलं कुंदादिनत्कार्ये समाहाराभिधानार्थं व्यास्तसर्वर्तुसमाहारसिद्धिः कारणा विना ३५

यत्रेति यत्रालकायां पादपा वृक्षाः नित्यं पुष्पाणि येषां ते तथा न त्वृतु नियमादिति भावः अत एवोन्मत्तैर्भ्रम-
रैः मुखरा शब्दायमानाः न लिप्ताः परिचिन्त्यानि नित्यानि पद्मानि यासां तास्तथा न तु हेमन्तवर्जितमित्यर्थः अत एव
हंसश्रेणीभी रचितरशना नित्यं हंसपरिवेष्टिता इत्यर्थः भवनशिखिनः क्रीडामयूराः नित्यं भास्वन्तः कलापा व-
र्हाणि येषां ते तथोक्ताः न तु वर्षास्वेव अत एव केकाभिः कलकेकादा उद्ग्रीवाः प्रदोषा रात्रयः नित्यं ज्योत्स्ना येषां ते
नित्यज्योत्स्नाः न तु शुक्लपक्ष एव अत एव प्रतिहता नष्टा तमसो वृत्तिर्व्याप्तिर्येषां ते ते च ते रम्याश्च प्रतिहततमोवृत्तिरम्याः तथोक्ताः २०

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पाः हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः केकोत्कण्ठा भव-
नशिखिनो नित्यभास्वत्कलापाः नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः २० आनन्दोत्थं नयनस-
लिलं यत्र नान्यैर्निमित्तैर्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् नाप्यन्यस्मात् प्रणयकलहाद्विप्र-
योगोपपत्तिर्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति २१

आनन्देति यत्रालकायां वित्तेशानां यक्षाणां वि-
त्ताधिपः कुबेरः स्यात्स भोधनिकयन्नयोरिति शाश्वतः यक्षाणां वे आनन्दोत्थमानन्दजन्यमेव नयनसलिलं अश्रु नान्यैर्निमि-
त्तैः शोकादिभिर्न खलु नास्त्येव इष्टसंयोगेन प्रियजनसमागमेन साध्यात् निवर्तनीयात् तत्समनीकार्यादि-
त्यर्थः कुसुमशरजात्मदनदशात् तापात् अन्यस्तापो नास्ति प्रणयकलहात् अन्यस्मात् शरणादिकारणात् विप्रयो-
गोपपत्तिर्विरहप्राप्तिर्नास्ति किं च यौवनादन्यद्वयो वार्द्धकं नास्ति एतत् श्लोकद्वयं प्रक्षिप्तम् २१

मे॰ टी॰ ३६ यस्यामिति यस्यामलकायां यक्षा देवयोनिविशेषा उत्तमस्त्रीसहाया ललितांगनासहचराः संतः सितम॰
णिमयानि स्फटिकमणिमयानि चंद्रकांतमयानि वा अत एव ज्योतिषां तारकाणां छायाप्रतिबिंबान्येव
कुसुमानि तै रचितानि परिष्कृतानि ज्योतिस्ताराश्चिभास्वाला रक्तपुत्राद्यथाध्वराल्मखितिवेजयंति एतेन॰
यानभमेरम्लातशोभान्वमुक्तहर्म्यस्थलान्येत्य प्राप्य त्वद्गंभीरध्वनिगर्जितेर्यषानेषु पुष्करेष्वाद्यभांडमु॰
रवेपुष्करं कोरिहस्ताद्येवाद्यभांडमुखेजलतरंगमरं शनकैः मंदमाहतेषु सत्सु एतत्कल्पतरोगीतयारपुप॰

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः
आसेवंते मधु रतिफलं कल्पवृक्षप्रसूतं त्वद्गंभीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ७१ राम॰

लक्षयां कल्पवृक्षप्रसूतं कल्पवृक्षस्य कोटितानार्थप्रदस्मान्मधु पिबतयमसृतं रतिः फलं यस्मात् इति फलं स
दजाततन्वाद्रतिफलाख्यं मधु मद्यमासेवंते आदरेण पिबंतीत्यर्थः नालिकेररसिताम्रतामलगडेत्यमता
स्थिकालाद्भयाधात्रिंद्रद्रुममोररसानकदलीगर्भगर्भप्रसूतेर्युतं स्निग्धं चैनमधप्रष्ठाभंगपुष्पविनेहृष्या ३६
दुमलामृतक्वाथेन स्मरदीपनं रतिफलाख्यं स्वादुशीतं मधु इति मदिरा सवे ७२ राम ॥

मंदाकिन्याइतियत्रालकायाममरैः प्रार्थिताः प्रार्थ्यमानाः सौंदर्येणेत्यर्थः कन्यापतिकुमार्यः कन्याकुमार्यः क
न्याकुमारिकानार्योरितिविश्वः शिशिरैर्मंदाकिन्याः गंगायाः पयसि महद्भिर्मारुतैः सेव्यमानाः सम्यः
तेयाउनतटेषुरोहंतीत्यनुतटरुहः किय उपपदमतिङिति समासः तेषां मंदाराणां छायया अनातपेन
वारितोष्णाः शमितातपाः समः कनकस्य सिकतानां मुष्टिभिर्निक्षेपेण गूढैः संहतैः अथवा कनकसि

मंदाकिन्याः पयसि शिशिरैः सेव्यमाना मरुद्भिर्मंदाराणामनु
तटरुहां छायया वारितोष्णाः अन्वेष्टव्यैः कनकसिकतामुष्टिनि
क्षेपगूढैः संक्रीडंते मणिभिरमरप्रार्थिता यत्र कन्याः ७३ गम

कतानां मुष्टिभिर्निक्षेपेण गूढैः अतएवान्वेष्टव्यैः अन्वेषणीयैर्मणिभिः रत्नैः संक्रीडंते गूढमणिसंज्ञया दे
शिकक्रीडया सम्यक् क्रीडंत इत्यर्थः क्रीडोनुसंपरिभ्यश्चेत्यात्मनेपदं रत्नादौ वा गूढमणिद्रष्टव्यकर्म
भिः बालिकाभिः कृता क्रीडा नाम्ना गूढमणिः स्मृता आवासक्रीडा गूढमणिः गूढमकेलिस्तु लायन
पिच्छकं डकं दात्रे स्मृता कंडकाकेलय इति शब्दार्णवे ७३ ॥

मे॰ दू॰ टी॰ ३२

नीवेति यत्रालकायांम्अनिभृतकरेषुचपलहस्तेषुप्रियेषुनीवीवस्त्रग्रंथिःनीवीपरिपणोग्रंथौस्त्रीणां
जघनवाससीतिविश्वः नीव्येवबंधोनीवीबंधः वृमहत्तवदर्पोत्तननत्तोच्छसितेनत्रुटनेनशिथि
लंक्षौमंदुकूलंरागादातिपत्स्वआहरत्स्वआहस्तसुह्रीमूढानांलज्जाविद्राणांबिंबंबिंबिकाफ
लंबिंबिकायांप्रतिबिंबेचमंडलेइतिविश्वः बिंबमिवाधरोयासांतासांबिंबाधराणांस्त्रीविशे

नीवीबंधोछसितशिथिलंयत्रबिंबाधराणाम् ॥
क्षौमंरागादनिभृतकरेष्वाक्षिपत्सुप्रियेषु अ॥
र्चिस्तुंगानभिमुखमपिप्राप्यरत्नप्रदीपान् ह्री
मूढानांभवतिविफलप्रेरणाच्चूर्णमुष्टिः ७४

षाणांविशेषः कामिनीकांताभीरुबिंबाधरांगनेतिशाब्दार्णवे चूर्णस्यकुंकुमादेर्मुष्टिःअर्चि
र्भिर्मयूखशिखयोरितिविश्वः रत्नान्येवप्रदीपान्अभिमुखंयथातथाप्राप्यापिविफलप्रेरणो
दीपनिर्वापणाद्दत्तमन्त्यात्रिःफलादेयोभवतिअत्रांगनानांरत्नदीपनिर्वापणासहत्वामोक्षबंधः मेदूटी ३२

नेचेति हे मेघ नेत्राग्रे रचेत् तस्य ततगतिना सदागतिः सदागतिना वायुना मातरिश्वा सदागतिरित्यमरः यद्विमानाग्रभूमी
र्यस्याग्र लकायाः विमानाग्रनाम मम भूमिक भवानाग्रभूमिः कपरिभूमिकानीताः प्रापिताः वामिव पश्यतीति त्वा
दृशाः त्वत्सदृशाः भवादृशाः समर्थ त्वदादि पुरुषशोः नालोचने कर्श्चेतिक यस्य जलमुचामेवा आलेख्यानां सवि
त्राणां सविर्जेति शिल्पिनः पर्यस्यादालेख्यं तु पत्रतः निर्मितो नमस्ति शोद्धाः शिवे सलिलकणिकाभिर्जलकणैर्दोष
स्फोटन मुत्पादयतः शंकास्पृष्टाः सद्वृत्तापराधत्वाद्भयाविष्टाः वशंकाविनतके भययोरितिसा व्यर्णे ध मार्गः रस्य
मतिरी मस्यानुस्मृतलोकग्रन्न करणीनिपुणाः ऊष्मालाः ऊर्ध्वा विशीर्णाः संततं जालमार्गै र्गवाक्षरन्ध्रैः निर्यान्तीति
नेत्रानीतः सततगतिना यद्विमानाग्रभूमीः आलेख्यानां सलिलकणिकादोषमुत्पाद्य सद्यः शंकास्पृष्टाः इव जल
मुच्स्त्वादृशा जालमार्गैर्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ७५ यत्र स्त्रीणां प्रियतमभुजोच्छ्वासिता
लिंगितानामंगग्लानिं सुरतजनितां तन्तुजालावलम्बाः त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे व्यालुम्प
न्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ७६॥ कामं निःसत्याकेन चिद्वनः ७ रसं चारेव नारतेन गरुडस्या रूढस्य भू
मिप्राप्तिनात्व स्त्रीणां व्यभिचार दोषमुत्पाद्य सद्यः साशंकाः स्फुरत्वं पातराताराः त्वद् मार्गेण कामं नितरां इति
निध्वनिः म्लानार्थ शंकास्पृष्टाः इत्यन्वयः ७५ हे मेघ यत्र कामानि शीथः हैरात्र निशीथौ द्वावित्यमरः त्वत्संरोध
स्यमेघावरणस्यापगमेन विशदैर्निर्मलैः चन्द्रपादैश्चन्द्ररश्मिभिः पादा रश्म्यंघ्रितर्याशाः इत्यमरः स्फुटजललवस्य
न्दिनः स्पष्टमुदकबिन्दुस्राविणः तन्तुजालावलम्बाः वितानलम्बिताः संपुटजा धाराः तद्गण्ये फित्यामर्थः चन्द्रकान्ताः चन्द्रका

अत्यथेति सेनं शंकाः सप्यात्तप्यजच्चोराशकार्थे निपातः ततो नञ्समासः भवनानामंतर्भवनं अव्ययं विभक्तीत्यादिनाव्ययीभावः
अत्यया अंतर्भवनमंतर्भवनेवानिधयो येषां तेन योक्ताः प्रवेच्छाभोगसंभवानार्थं मिदं विशेषणं विबुधवनिता अप्सरसः ताए
व वारमुख्या वेश्याविशेषाः तासहाया येषां तेन योक्ताः चारस्त्री गणिका वेश्या रूपाजीवाथ साजनैः सत्कृता वारमुख्यास्या
रिसमरः वहुलाया संभाविनसंलापाः कामिनः कामिकाः अरत्यः इति अमरः अव्ययं विभक्तीत्यादिना समासः अनस्त्रेति स
मासांत एत्तू अदन्तत्वोरेवेति टिलोपः रक्तो मधुरः कंठः कंठध्वनिर्येषां तैस्तैः रक्तकंठैः धनमतियशुः कुबेरकीर्तिं मत्युपायद्भिः
देवगानतत्परं गंधर्वग्राममन्वानास्तैरगायद्भिरित्यर्थः किन्नरैः सार्द्धं सह विभ्राजमित्याख्यायस्यतैर्ह वैभ्राजाख्यं विभ्राजेन नगेंद्र

अत्यन्तं अंतर्भवननिधयः प्रत्यहं रक्तकंठैरुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्द्धं वैभ्राजाख्यं विबुधवनितावारमुख्या
सहाया बद्धालापा बहिरुपवने कामिनो निर्विशंति ॥ गत्युत्कंपादलकपतितैर्यत्र मंदारपुष्पैः पत्रच्छेदैः कनककम
लैः कर्णविभ्रंशिभिश्च मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारैः नैशो मार्गः सवितुरुदये सूच्यते कामिनीनां ॥ ३८

भ्राजाते वैभ्राजमाख्यायेति शंभुरहस्ये चैत्ररथस्य नामांतरमेतत् वहिरुपवने वासोद्याने निर्विशंत्यनुभवंति ॥ गत्यु
नौति यत्रालकायां कामिनीनामभिसारिकाणां निशि भवो नैशो मार्गः सवितुरुदये सति गत्यागमनेनोत्कं
प स्खलनं तस्माद्धेतोः अलकेभ्यः पतितैः मंदारपुष्पैः सुरतरुकुसुमैः तथा पत्राणां पत्रलतानां छेदैः खंडैः पति
तैरितिशेषः कर्णेभ्यो विभ्रंशंतीति कर्णविभ्रंशीनि तैः कनककमलैः कनककमलैः स्वर्णपद्मैः विवरीतार्थे
ताभेमतिमपराविशहेः ध्याहारदोषएवमग्राण्यनुसंधेयं तथा मुक्ताजालैर्मौक्तिकसारैः शिरोनिहितैरितिशेषः त
थास्तनयोः परिसरः प्रदेशस्तत्र छिन्नानि सूत्राणि येषां तैः हारैः सूच्यते ज्ञाप्यते मार्गोपनितमंदारकुसुमादिलिंगै

मत्वेति हे जलद यत्रालकायां मन्मथो धनपतेः कुबेरस्य सखायं इति धनपतिसखः राजाहःसखिभ्यष्ट
च् नं देवं महादेवं साक्षाद्वसन्तं सगविग्रहेण त्रिनेत्ररूपेण वसन्तं वर्तमानं मत्वा ज्ञात्वा भयात् भालेक्ष
णभयात् षट्पदा एव ज्या मौर्वी यस्य तं चापं प्रायः प्राचुर्येण न वहति न बिभर्ति कथं तर्हि तस्य का
र्यसिद्धिरित्यत्राह सभ्रूभंगेति तस्य मन्मथस्यारंभः कामितनवनितप्यापारः सभ्रूभंगप्रहितनयनैः

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम्
सभ्रूभंगप्रहितनयनैः कामिलक्ष्येष्वमोघैस्तस्यारंभश्चतुरवनिताविभ्रमैरेव सिद्धः॥१०॥

नयनानि दृष्टयो येषु तैस्तथोक्तैः कामिन एव लक्ष्याणि तेष्वमोघैः सफलप्रयोगैरित्यर्थः मन्मथचा
पलक्षणविदग्धमोघः स्यादिति भावः चतुरास्वन्ता वनिता स्वनासां विभ्रमैर्विलासैरेव सिद्धो भवति
भवत्रः यद्दनर्थकं रर्पादिकफले च तन्मयोगाहरं निश्चितसाधनमयोगेति भावः॥१०॥ कथं यथार्थं देह
दाहं परिधेयं विलेपनं च तद्भूषणमाह स्त्रीणामन्येद्दैः शिवकमितिरसाकरेन देनदाह॥११॥

मे॰ दू॰ टी॰ ३५

वासइति यत्रालकायांचित्रंनानावर्णंवासस्त्रवस्त्रंपरिधेयमंडनमेतत् नयनयोर्विभ्रमाणामादेशो
उपदेशोदक्षंविभ्रमाधायकमित्यर्थः मधुमद्यमनेनविभ्रमेद्वारामधुमोमंडनत्वमनुसंधेयंतच्चमंडना
दिवदेहधार्यैःतर्भावोकिसलयैःपल्लवैःसहपुष्पोद्भेदं३भयंचेत्यर्थः३देहकचधार्यंभूषणानां

वासश्चित्रंमधुनयनयोर्विभ्रमादेशदक्षं पुष्पोद्भेदंसहकिसल
यैर्भूषणानांविकल्पान् लाक्षारागंचरणकमलन्यासयोग्यंच
यस्यामेकःसूतेसकलमबलामंडनंकल्पवृक्षः ८० ॥

विकल्पान्विशेषान्देहधार्यमेतत् तयाचरणकमलयोर्न्यासस्यसमर्पणस्ययोग्यंर
ज्यते३नेनेतिरागोरंजनद्रव्यंलाक्षैवरागस्तंलाक्षारागंच३दंचयगरागादिविलेपनमंड
नोपलक्षणमितिसकलंसर्वंचतुर्विधमयीत्यर्थः अबलामंडनंयोषित्प्रसाधनजातमे
कःकल्पवृक्षएकलसर्वंएवसूतेजनयति नतुनानासाधनेसंपादनमयासइत्यर्थः ८० ३५

तस्या इति तस्या वाप्यास्तीरे पेशलैः स्निग्धैः चारुभिः चागोदलेवयेषाल इत्यमरः इंद्रनीलैः रचितशिखरः इंद्रनीलम
णिमयशृंगस्थ्यैः कनककदलीनां वेष्टनेन परिधानात्प्रेक्षणीयो दर्शनीयः क्रीडाशैलोऽस्तीति शेषः हे
सखे उपांतेषु प्रांतेषु स्फुरिता तडितो यस्य तं तथोक्तं इदं विशेषणं कनककदलीसाम्यार्थमुक्तं इंद्रनील
साम्यं तमेव तस्य स्वाभाविके त्वामिमं तेन सूच्यते त्वां प्रेक्ष्य मद्गेहिन्याः प्रियः इति हेतोस्तस्य शैलस्य मद्गेहिन्याः
प्रियत्वाद्धेतोरित्यर्थः कातरेण भीतेन चेतसा भयं चात्र सानंदमेवैतन्नाम तत्त्व श्रवणादर्शनात् श्रव

तस्यास्तीरे रचितशिखरः पेशलैरिंद्रनीलैः क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः मद्गे
हिन्याः प्रिय इति सखे चेतसा कातरेण प्रेक्ष्योपांतस्फुरिततडितं त्वां तमेव स्मरामि ८२

णात्कीर्तनाद्दापि सा नेदाभीर्ययास्मार्भवेदित्यस्याकरदर्शनात्तमेव क्रीडाशैलमेव स्मरामि एवकारो विषयो
तरव्यवच्छेदार्थः सदृशवस्त्वनुभवादिदृढार्थस्मृतिर्जायत इत्यर्थः अत एवात्र स्मरणाख्यमलंकारं तदुक्तं
सदृशानुभवादन्यस्मृतिः स्मरणमुच्यत इति निरुक्तकारस्तु तांतमेव स्मरामि इति योजयित्वा मेघे शैलत्वा
रोपमवष्टेन दृष्टमनादृत्य वा तत्र घाकारो यस्य पुरोवर्तिन्यनुभवात्मकत्वेन स्मरति शब्दस्य योग्यायोग्या
त् शैलत्वभावनास्मृतिरिति पिनोपपद्यते भावनाया स्मृतिरूपेमासा एणाभावादनुपयोगात्तस्मादस्योप
पन्यासवैयर्थ्यात्तद्विसदृशो शालिन्या मद्गेहिनीभावनादर्शनादिति ८२ ॥ रामाय नमः

मे. टी. ८५

रक्तेति अत्र क्रीडाशैले कुरवकाख्यवृक्षवृतिरावरणीयस्य तस्य मध्ये वसंते भवा माधव्यस्तासां मंडपस्य सान्निध्य
केलतागृहस्य प्रतिमतः पुष्टकः स्यादासुतिर्माधवीलतेत्यमरः अस्याः सत्रासन्निविष्टौ चलकिसलयश्चल
पल्लवः अनेन वृक्षस्य पादताडनेभुमांगलेत्वेव्यज्यते रक्ताशोकः रक्तविशेषणेन तस्य साहाय्यपकत्वान्व
नेप्रसन्नकेसरपात्वक्ल केसरो रक्तः इति द्विधा बहुसिद्धिकरः केनारक्तोत्र स्मरवर्द्धनत्वं यः शोकः कल्पदर्शना
नकांतः कामनीयः केसरो वकुलः प्रत्यग्रौ वकेसरो वकुलो वञ्जुल इत्यमरः स्वरतिशेषः एकस्तयो रन्यतरः अ
शोकस्त्वादशोकः इत्यर्थः मया सह तव सख्याः स्वप्रियाया इत्यर्थः वामपादाभिलाषी दोहदछद्मनेत्य

रक्तोशोकश्चलकिशलयः केशरश्चात्र कांतः प्रत्यासन्नौ कुरवकवृतेर्माधवीमंडपस्य एकः सख्या
स्तव सह मया वामपादाभिलाषी कांक्षत्यन्यो वदनमदिरां दोहदछद्मनास्याः ८५ ॥

यापि संवेधनीयं सवाहं वाभिलाषवानित्यर्थः अन्यो केसरो देहहंस्त्र्यादीनां प्रसवकारणं संस्कारद्रव्यं तरुगु
ल्मलतादीनामकाले कुशलैः कृतं पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तत्क्रियेति शब्दार्णवेन स्यादछद्मना
व्याजेन कपटो स्त्रीव्याजदंभोपधयः छद्मकैतवे इत्यमरः अस्यास्तव सख्या वदनमदिरां गंडूषमद्यं कांक्षति
या सेहमत्रापि संवेधनीयं अशोकवकुलयोः स्त्रीपादताडनगंडूषमदिरे दोहदं इति प्रसिद्धिः स्त्रीणामस्प
र्शात्प्रियंगुर्विकसति वकुलः शीधुगंडूषसेकात् पादाघातादशोकस्तिलककुरवकौ वीक्षणालिंगनाभ्यां मंदारो

तन्मध्य इति किंचेति चार्थः तन्मध्ये तयोर्वृत्तयोर्मध्ये अनतिप्रौढानामनतिकठोराणां वंशानां प्रकाशाइव प्र-
काशो येषां तैस्तृणवेणुसादृश्यैर्मणिभिर्मरकतशिलाभिः मूले बद्धा कृतवेदिकेत्यर्थः स्फटिकमयफलकं पी-
ठं यस्याः सा स्फटिकफलका काञ्चनस्य विकारः काञ्चनी सौवर्णी वासयष्टिर्निवासदण्डः स्त्रीति शेषः शिञ्जाभू-
षणध्वनिः भूषणानां तु शिंजितमित्यमरः भिदादित्वादङ् प्रत्ययः शिजिधातोरयनाल्टिनेनदम्यादिः योऽवशि-
न्त इति दर्शनात् शिंजाप्रधानानि वलयानि शिंजावलानि तैः सुभगा रम्यास्तैस्तालैः करतलवादनैर्मम

तन्मध्ये च स्फटिकफलिका कांचनी वासयष्टि र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः तालैः
शिंजावलयसुभगैर्नर्तितः कांतया मे यामध्यास्ते दिवसविगमे नीलकंठः सुहृद्वः ८५

कांतया नर्तितो वो युष्माकं सुहृत् सखा नीलकंठो मयूरः मयूरो बर्हिणो बर्ही नीलकंठो भुजंगभुगित्यम-
रः दिवसविगमे सायंकाले यां यष्टिकामध्यास्ते यस्यामालम्ब्य तिष्ठति अधिशीङ्स्थासां कर्मेति कर्मत्वा-
द्द्वितीया अत्रागारमित्यारभ्य पंचसु श्लोकेषु अतिसमृद्धवस्तुवर्णनादुदात्तालंकारः तदुक्तं तदुदात्तं
भवेद्यत्र समृद्धं वस्तु वर्ण्यत इति न चैषा स्वभावोक्तिः स्वभाविकं च तत्तद्यथास्थितवस्तुवर्णनात् अत्र च
कविशक्तितोन्यापितासमानैश्वर्यशालिवस्तुवर्णनादेतस्यापि न विषयत्वमिति ताभ्यामस्य भेदः इत्य-
लंकारसर्वस्वीकारः ८५ ॥

मे.दू.
टी.
५२

नाभिरिति हेसाधो निपुणाः साधुः समर्थे निपुणो चेति काशिकायां ॥ इत्यभिहितैः रविस्पष्टैरित्यर्थः एभिः पूर्वो
क्तैः लक्षणैः तोरणादिभिरभिज्ञानैः द्वारोपांते एकवचनमविवक्षितं द्वारयोः पार्श्वयोरित्यर्थः लिखिते वपु
षी आकृती ययोस्तौ तथोक्तौ शंखपद्मौ नाम निधिविशेषौ निधिर्नाशेवधिर्भेदाः पद्मशंखादयो निधे
रित्यमरः दृष्ट्वा च नूनं सम्प्रत्यधुनेदानीमथ नीति निपातः मद्वियोगेन मम भवासेन क्षामच्छाय

एभिः साधो मनसि निहितैर्लक्षणैर्लक्षयेथाः द्वारोपांते लिखितवपुषौ शंखपद्मौ च दृष्ट्वा
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं सूर्यापायेन खलु कमलं पुष्यति स्वामभिख्यां ८६

तुल्यतोपरमात् क्षीणकांतिभवनं मद्गेहं लक्षयेथाः निश्चिनुयाः तथाहि सूर्यापाये सूर्यापग
मे सति कमलं पद्मं स्वामात्मीयामभिख्यां शोभां अभिख्या नाम शोभयोरित्यमरः आतपशो
पमयोः सम्प्रत्ययः न पुष्यति नोपचिनोति खलु सूर्यविरहितेन पद्मामिव गृहं ५२
पतिविरहितं गृहं न शोभत इत्यर्थः ८६ गमः

निजगदति स्थयानेनरेक्तसमाह गत्वेति हे मेघ शीघ्रसंपातपवहेतु शीघ्रसंपातहेतुस्तस्य शीघ्रसंपातहेतोः शीघ्र
प्रवेशनार्थमित्यर्थः षष्ठी हेतुप्रयोगे निषष्ठी संपातः पतितेयोगप्रवेशवेदसंविदोरिति शब्दार्णवे सद्यः सप
दि कलभस्य करिपोतस्य तनुरिव तनुर्यस्य तस्य भावस्तत्तां अल्पशरीरतां गत्वा प्रथमकथिते तस्यास्तीरे इत्या
दिना पूर्वोपदिष्टे रम्यमानो निषीदनयोग्य इत्यर्थः क्रीडाशैले निषण्ण उपविष्टः सन् अल्पप्रकाशभाः

गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः क्रीडाशैले प्रथम
कथिते रम्यसानौ निषण्णः अर्हस्यंतर्भवनपतितां कर्तुमल्पा
ल्पभासं खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ८०

प्रकाशो यस्यास्तामल्पाल्पभासं प्रकारेगुणवचनस्येति द्विरुक्तिः खद्योतानां मालीपंक्तिः तस्या वि
लसितेन स्फुरितेन निभां सदृशप्रकारे गुणवचनस्येति द्विरुक्तिः खद्योतमानां विद्युदुन्मेषो विद्युत्प्रकाशः
सएव दृष्टिः तां भवनस्यांतरंतर्भवनं तत्रपतितां प्रविष्टां कर्तुमर्हसि यथा कश्चित्किंचिदान्विष्य
न कश्चिदुन्नतप्रदेशोस्थित्वा शनैः शनैः पतति तरां द्राघीयसी दृष्टिः उच्चदेशपातयति तद्वदित्यर्थः ८०

मे.दू.
टी.
५३

सप्तमि रक्षिणामप्युलसाभिज्ञानं श्लोकद्वयेनाह तन्वीति तन्वी कृशाङ्गी न तु पीवरी शृङ्गारोद्रेके कृशेत्यनतरिम मरः वी
नोगुणवचनात्स्त्रियां ङीप् श्यामा युवतिः श्यामा यौवनमध्यस्थेत्युत्पलमालायां शिखराणि सन्ति येषां ते शिखरि
णः कोटिमन्तः शिखरं शैलवृक्षाग्रकक्षापुलककोटिष्विति विश्वः शिखरिणो दशना दन्ता यस्याः सा शिखरिदशना
पद्मेसाः भाग्यवत्पस्तुः पुष्करत्वकस्त्र्यते तदुक्तं सामुद्रिके स्निग्धाः समानरूपाः सुपंक्तयः शिखरिणः स्निग्धाः दन्ता भ
वंति यासां ताः पालयंति जगत्सर्वं नरवलसस्रकाः सुः स्फुरभासः समाः दयाः यस्याः शिखरिणो दन्ता दीर्घजीवनितास्य
यः इति पक्वं परिणतं यद्बिम्बं बिम्बिकाफलं मिवाधरोष्ठो यस्याः सा पक्वबिम्बाधरोष्ठी शगकुपार्थिवादित्वान्मध्यमपदलोपी
समासः इति वामनः नासिकोदरोष्ठेत्यादिना ङीष् मध्ये क्षामा कृशोदरी मध्यं चकितहरिण्याः प्रेक्षणानीव प्रेक्षणानि

म

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः श्रोणीभारा
दलसगमना स्तोकनम्रा स्तनाभ्यां या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ८८ ॥ इत्युक्ते यस्याः सा तथोक्ता प

तेनस्यास्याः पद्मिनीत्वं सूच्यते तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे इति निम्न
नाभिर्गंभीरनाभिः अनेन नारीणां नाभिगाम्भीर्यं सत्त्वरसातिरेक इति कामसूत्रार्थः सूच्यते श्रोणीभाराद् अलसग
नामन्दगामिनी न तु जघनदोषात् स्तनाभ्यां स्तोकनम्रा ईषदवनता अवश्चदोषात् युवत्य एव विषयस्तस्मिन् युवतिवि
षये युवतीरचयितुं स्रष्टुं धातुर्ब्रह्मणः आद्या सृष्टिः प्रथमशिल्पमिव स्थिते त्युत्प्रेक्षा प्रथमनिर्मिता युवतिरिवे
त्यर्थः प्रायेण शिल्पिनां प्रथमनिर्माणे प्रयत्नातिशयवशाच्छिल्पनिर्माणसौष्ठवं दृश्यत इत्यायविशेषणोन्यथा वा
लिख्यपं चेनतुद्या पिप्लेविधिं समग्रीयरत्नेष स्त्रीति भावः तदेवं भयाया स्त्रीनत्रात नर्भवनेस्यात् तत्र निवसे दित्यर्थः नाभिज्ञ

सटीकमेघदूतः
५३

सर्वविरहिणीसाधारणात्वेनानिसंभावइति आलोकेइत्यादिभिस्त्रिभिः आलोकेनिर्देमेव सामस्त्येयावत्तिष्ठ
न्तिष्वेषु शेषित्वागमनार्थेषु देवताराधनेषु व्याकुलतावा विरहेणेतन्नुहंशमावगम्यैतत्कार्यस्याहंहस्तचिरत्वा
त्संभावनिसंभावनयोन्येतस्मिन्नर्थः तत्साहश्यं मदाकारसाम्यं मन्यन्निहितनिमित्तमर्थः यद्यपि सादृश्यंनामशशि
हंसत्वंतरगतमाकारसाम्यं तन्निहितनिमित्तमर्थं तथापि प्रतिकृतित्वेन विवक्षितमिति इतरथालेख्यमा
त्रमभवात् अतएवकोशेआलेख्यपिच सादृश्यमिति अभिधानात् लिखन्तीकचित्फलकादौविन्यस्यन्तीवाचि
च्चदर्शनस्यविरहिणीविनोदोपायत्वादितिभावः एतच्चकामशास्त्रसंवादेनसमयिवेदितमस्माभिरस्त

आलोकेते निपतति पुरा सा बलिव्याकुलावा मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती पृच्छन्ती वा
मधुरवचनां सारिकां पञ्जरस्थां कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ५१ वेशसंज्ञो विन्यासादृ
श्यप्रतिकृतिदर्शनैः प्रियायाः स्वमधुरवचनां मञ्जुभाषिणीमेतत्पदं मेजरस्याहिंत्वभ्यः कृतन्नमेरहत्व
णमित्यर्थः सारिकां स्त्रीपक्षिविशेषं हे रसिके भर्तुः स्वामिनः स्मरसि कच्चित्स्मरसि किं कच्चित्कामप्रवेद
नइत्यमरः भर्तारं स्मरसि किमित्यर्थः अधीगार्थदयेशां कर्मणि निषष्ठीमात्रशेषाधिकारात् शेषत्वविवक्षा
तायामेव कर्मत्वविवक्षायां तु द्वितीयैव भवतीति चरितव्यं स्मरणकारणमाह हियस्मात्कारणात्त्वं भर्तुः
प्रीणातीति प्रियाइगुपधाज्ञाप्रीकिरः कइतिकः प्रत्ययः अतः प्रेमास्पदत्वात्स्मर्तुमर्हसीतिभावः इत्येवं ९९

गोंकं मन्नामांकं यथा तथा गेयो २

मे॰टी॰ ८५ उत्संगेति हे सौम्य साधो मलिनवसने शोषिते मलिमाक्लेशेति यावत् तादृशे इत्यर्थः उत्संगे उरौ वीणां निक्षिप्य मम गो॰
त्रे नामांकं चिह्नं यस्मिन् तन्मद्गोत्रं तदेव नामांकं वा अस्मिन्नेव मम गुणैः विरचितानि पदानि यस्य तत् तथोक्तं गेयं गानार्हं प्रबं
धादि गीतमिति निपादमप्यर्थः उद्गातुमुद्गातुं उच्चैर्गातुं कामो यस्याः सा उद्गातुकामा तुं काममनसोरपी
ति मकारलोपः देवयोनित्वाद्गांधारग्रामेण गातुकामेत्यर्थः तदुक्तं षड्जमध्यमनामानौ ग्रामौ गायंति मानुषाः
न तु गांधारनामानं स लभ्यो देवयोनिभिरिति तथा नयनसलिलैः प्रियतमस्मरणनितैरश्रुभिरार्द्रां तंत्रीं क

उत्संगे वा मलिनवसने सौम्य निक्षिप्य वीणां मद्गोत्रांकं विरचितपदं गेयमुद्गातुकामा तं
त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचिद् भूयो भूयः स्वयमपि कृतां मूर्छनां विस्मरंती ४२ ॥

थंचित् कष्टेन सारयित्वा आर्द्रत्वात् करेण मृज्य अन्यथा क्वणनासंभवादिति भावः भूयो भूयः पुनः पुनः
स्वयमात्मना कृतामपि विस्मरंती न्विति यावदर्थः मूर्छनां क्रमविशेषविशिष्टस्वरस्यापमां सागवे
षु विलोपेन स्यात् यत्र स्वस्वपूर्वेभ्यः स्वराणां स्थापनात्मिका मूर्छनाः सप्तसप्त भवंतीति संगीतरत्नाकरे विस्म
रंती वा आलोके ते निपतती निपूर्वेणान्वयः विस्मरणं चात्र दर्शितं गुणस्य निजचित्तमूर्छनावशादेव त॰
था स्मररत्नाकरे वियोगायोगयोरिष्टस्मरणानां कीर्तनात् स्मृतेः साक्षात्कारो यत्र नाम स्फुटदशधा जायते तथा ८५

शेषानिति अथवा विरहस्य दिवसस्स्थानयापितस्य तत आरभ्य विश्वतस्यावधेः तस्य शेषान् गतनावशिष्टा-
न्मासान् देहलीदत्तपुष्पैः द्वारशाखाधारदारुगृहद्वारग्रहणी देहल्यं गणनाक्षिप्तमरः तत्र दत्तानि राशि-
त्वेन निलितानि यानि पुष्पाणि तैर्गणनया एकोद्वाविंशतिसंख्यानेन भुवि भूतले विन्यसंती वा
पुष्पविन्यासैर्मासान् गणयंतीत्येवमर्थः यद्वा हृदयनिहितो मनसि संकल्पितः आरंभउपक्रमो

शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा विन्यसंती भुवि गणनया देहलीदत्तपु-
ष्पैः संभोगं वा हृदयनिहितारंभमास्वादयंती प्रायेणैते रमणविरहेष्वंगनानां विनोदाः ॥ ८२

यस्य तं अथवा हृदये निहिता आरंभाश्चुंबनालिंगनादयो व्यापारा यस्मिन् तं संभोगं भोगरतिमा-
स्वादयंती अनुभवंती वा आलोके ते निपततीति पूर्वेण संबंधः ननु कथमयंति अत आह प्रायश इति का-
र्यांतरस्याभावेन परिहरति प्रायेण भूम्ना अंगनानां रमणविरहेष्वेते पूर्वोक्ताः विनोदाः कालया-
पनीयाः एतेन संकल्पावस्थोक्ता नडुक्तं संकल्पो नाम विषयमनोरथ उदाहृत इति ॥ ८२

मे.दू.
टी.
५६

सव्यापारामितिकालापकं देसखेअद्दनिधिवसेसव्यापारां पूर्वोक्तवलिपुष्पचित्रलेखनादिव्यापार॰
वंतीतेसखींस्वप्रियांविप्रयोगोविरहस्तस्यानेनप्रकारेणप्रकारेगुणवचनस्येतिथाल्तिथा॰
ल्प्रत्ययः नपीडयेत् यथारात्रौविनिशेषः किंतुरात्रौनिर्विनोदांनिर्व्यापारांतेसखींगुरुत॰
रागुरुःयस्यास्तांगुरुतरशुचंअतिदुःखमित्यर्थःशंकेतर्कयामिशंकाभयवितर्कयोरितिविश्वः
द्राणिव अतोनिशीथेऽर्द्धरात्रेउन्निद्रामन्तस्थनिद्राअवनिरेवशयनंयस्यायस्यास्तानियमा

सव्यापारामहनिनतथापीडयेन्मद्वियोगः शंकेरात्रौगुरुतरशुचंनिर्विनोदांसखींते
मत्संदेशैःसुखयितुमलंपश्यसाध्वींनिशीथे तामुन्निद्रामवनिशयनांसौधवाताय
नस्थः ९४ ॥

धंस्थंउत्तलशायिनीं साध्वींपतिव्रतांसतीसा ध्वीपतिव्रतेत्यमरः अतोनान्यथापश्यं॰
कितद्वामितिभावः त्वंव्यातत्ससखींमत्संदेशैर्मद्वार्त्ताभिः अलंपर्याप्तंसुखयितुमानंदयितुंसौ
धवातायनस्थः सौधवातायनगतः सन्पश्यस्वाधारात्रौचविनतोमित्रस्वजनशुकादयः सुख॰
यंतीएकयनस्वसखीपापैर्वियोगिनीमितिरसरत्नाकरेहतस्थायंमेघः इतिभावः अनेनजागरतान

मे.दू.
टी.
५६

पुनस्तामेव विशिनष्टि आधिक्षामामिति चतुर्भिः आधीति आधिर्नाम मनोव्यथा यया क्षामां मोहकृशां पुंस्याधिं
र्मानसी व्यथेत्यमरः क्षामेति वर्णेरितः क्षामो मङ्गति निष्ठानकारस्य मकारः विरहे शयने तस्मिन्वि
रहशयने पल्लवादिरचितशयने इत्यर्थः सन्निषस्सामेकपार्श्वं यस्यास्तां प्राच्याः पूर्वस्याः दिशो मूले उ
दयाद्रियाने इत्यर्थः प्राचीयस्य हणीतीमानवस्यायोतनार्थे मलश्च हगां ह्रस्वपन्नार्थे कलामात्रे कलेव शेषो

आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः
नीतारात्रिः क्षणमिव मया सार्धमिच्छारतैर्याः तामेवोष्णैर्विरहजनितैरश्रुभिर्यापयन्तीम् २८

यस्यास्तां प्रधानां पीसलत्ले मूर्तिमिव स्थितां पुनः किं विधं या रात्रिर्मया सार्धमिच्छया कृतानि रता
नि क्षारतानि तैः शाकपार्थिवादित्वान्मध्यमपदलोपी समासः क्षणमिव नीता यापिता तामेवानी
यामेव रात्रिं विरहेण महती महत्त्वेन मन्यमानां सतीम् असैरश्रुभिर्यापयन्तीं यातेषु पन्ताक्षर
मसयः अनिक्षीत्यादिना गुणागमः सपवकालः सखिनामल्पः मनीयतेऽङ्गः रविनान्तविपरीतमिति भावः

मेघ॰ पदानिति जालमार्गप्रविष्टान् गवाक्षविवरगतान् इंदोः पादान् इंदोः पादान् रश्मीन् पूर्व-
टी॰ प्रीत्या पूर्वस्नेहेन पूर्वं वदानंदकारा भविष्यतीति बुद्ध्येति भावः अभिमुखं यथागतेन तथैव
९७ सन्निवृत्तं तेन दानेषामतीदुःसहत्वादिति भावः चक्षुर्दृष्टिं खेदात्सलिलगुरुभिरश्रुभिः पक्ष्मभिः

पादानिंदोरमृतशिशिरान्जालमार्गप्रविष्टान् पूर्वप्रीत्या ग-
तमभिमुखं सन्निवृत्तं तथैव खेदाच्चक्षुः सलिलगुरुभिः पक्ष्मभि-
श्छादयंती साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ९८

रैः पक्ष्मभिः छादयंतीं अत एव साभ्रे अह्नि दुर्दिनेन प्रबुद्धां मेघावरणादविकसितां न सुप्तामा-
ह न्यमुकुलितां उभयत्रापि नञर्थेन शब्देन सह सुप्सुपेति समासः स्थलेकमलिनी-
मिवास्थितां एतेन विषयद्वेषात्स्वेच्छादशा सूचिता ९९ ॥ ९७

निस्वासेति शुद्धस्नानेलादिरहितस्नानात् परुषं कवितस्पर्शेनानूनं आगंडलंबं स्वस्वपेत्ति समासः अ
लकं चूर्णकुंतलान् ज्ञानाविकं वचनेऽधरकिशलयं क्लिश्यति क्लिश्यति क्लिश्नाति तिवान् यो
कोनोले ने स्पर्थं क्लिश्यते एर्णं तान् क्लिश्नाते एर्णं नाद्दानाच्छो ल्येरणी निः निस्वासेन विक्षिपंती

निस्वासेनाधरकिषालयक्लेशिनाविक्षिपंती शुद्धस्नानात्परुष
मलकंनूनमागंडुलंवं मत्संभोगः कथमुपनयेत्स्वप्नजोपीति
निद्रा माकांक्षंतीं नयनसलिलोत्पीडरुद्धावकाशां ९२ राम

वालयंती पुनः कीदृशी स्वप्नजोपि स्वप्नावस्थाजन्योपि मात्त्वात्संभोगात्संभवादिति भावः मत्संभोगः
कथंकेन प्रकारेणोपनयेत् प्रापयेदागच्छेत् इत्याशयेनेति शेषः इति नैवोक्तार्थत्वात् प्रयोगयोनरहस्यादित्याः
शंकानिरासः प्रार्थनायां लिङ् नयनसलिलोत्पीडेनाश्रुप्रवाहेण रुद्धावकाशा माक्रांतस्थानां इत्यर्थः
निद्रामाकांक्षंतीं स्वेदहानिरत्वादिति भावः अश्रुप्रविसर्जनेन लज्जात्यागो व्यज्यते ९२ रामः

मे॰ दू॰ आद्य इति आद्ये विरहदिवसे दामशिरोमालां हित्वा त्यक्त्वा या शिखा वद्धा ग्रथिता शापस्यान्ते विगलि
टी॰ तशुचा वीतशोकेन मयोद्वेष्टनीयां स्पर्शक्लिष्टां स्पर्शेन तिमलपाके भूतव्यथाभिन्नस्यैः कठिना
५८ वसाविषमस्य च कठिनविषमां तां एवं जकुब्जादिवदन्यतरस्य प्रधानस्य विवक्षया विशेषणं विशे॰

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा शापस्यान्ते विगलि
तशुचा तां मयोद्वेष्टनीयां स्पर्शक्लिष्टामयमितनखेनासकृत्सा
रयन्तीं गण्डाभोगात्कठिनविषमामेकवेणीं करेण ५८ एवं

षेणवद्भुलमिति समासः एकवेणीमेकीभूतवेणीं पूर्वकालेत्यादिना तत्पुरुषः तया भूतां शिखां
अयमितनखाः अकर्तितनखा यस्य तेन करेण गण्डाभोगात् कपोलविस्तारात् असकृत्सकृद्भ
हुः सारयन्तीं तां पयःपतिश्रैणासेवेधः असकृत्सारणाच्चितविभ्रमदशास्तूचिता ५८ ॥ ५८

मेति अवलाद्दुर्भला संन्यस्ताभरणशोभे त्वामपरिन्यस्ताभरणां असहद् अनेकपोडुःखदुःखेन दुःखप्रकारेण
प्रकारेणुणावचनस्येति द्विर्भावः शय्योत्संगेति हिमेदेशेनेस्टडुलेगाजे शरीरं धारयंती अनेनात्मनाप्रत्याप्र
क्षावस्थायास्तव्यत्वेसौन्दर्यस्य रक्तोत्तमपि नवजलमयेन वापुत्रपं अलंवाघ्यमवयप्रसर्वथा मोचयिष्यति द्विकर्म
स्यपत्रादीनां चोपसंख्यानमिष्यत इति मुचः पचादित्वाद्द्विकर्मत्वं तथाहि शायः मायेणद्वीनतरात्मा स्टडुदे
दयोमेवस्तइवांतः शरीरं सर्वैः करुणामयी हतिरेतकरणाहृतिर्यस्य सकारुणार्द्रहतिर्भवति हि यस्माद
स्मिन्न वसरे सर्वे यान्ययाप्तीत्यगंतव्यमनेन तरं शाद्वयदस्यपरिहारायेति सदर्भामिमायः नन्वकिमिदमां चेत्तः

सा तेन्यस्ताभरणामबला पेशलं धारयंती शय्योत्संगे निहितमसहद्दुःखदुःखेन गात्रं त्वामप्यश्र
नवजलमयं मोचयिष्यत्यवश्यं मायः सर्वो भवति करुणाहृतिरार्द्रांतरात्मा ॥ ९५ ॥ ॥ नम

मीति मुपेत्याव स्थांजनाएवभवान् कविर्रादनवान्नउच्यते संयोगो विप्रलंभश्चेति द्विधा शृंगार उच्यते प्र
तुरागमानाख्यप्रवासकरुणात्मना विप्रलंभश्चतुर्धात्र प्रवासस्तत्र विविधाकार्यतः संभ्रमाच्छापाद्
स्मिन्काव्ये तु शापजः भागसंगतयोरप्येनारितिश्चीत्तरं जनेनेचतः प्रीत्साद्योः वस्यादशाप्युर्त्सेतिनाः पुनः
हृश्ननः संगसेकल्यज्ञागराह्वशतारतिः ह्रीत्यागोन्मादमूर्छान्ताश्चपनेगदृशादशस्युः अवसंगतयोरेव प्रवासर
तिकारणाननतत्र पूर्वं वृत्तः प्रीतिरुत्पत्रमहे तिरुत्संगस्यत्संदस्याप्यविच्छेदोऽत्र वर्णयेत यन्यास्त्र पूर्ववद्दा
म्याउनिनावद्यवस्थितिः वेपर्याद्यादिसाहित्याविरसांदतिमानतयाऽरुत्समाद्दीरिहाचएकविरसावि०

मे॰ दू॰
टी॰
५५

निस्यितेममसारसंपलिखंतीतिपदेस्मिन्यतिपादिनावत्सःप्रीतिरितियोक्तंनिरन्तरंकृतानाननवत्सःप्रीतिभेवेविं
नेस्तहृष्वरदर्शनानंतयथामालविकृत्पमशिमिरसपपूर्णतिप्राषितानानभर्तृहेणाक्कहृस्राहृहृर्वेनाश्रयनेः
त्रापिमदेहस्वकेलत्राणिरकृतभर्तृप्रयाणमितास्याकिंवेरोपिकथानवाभवासादागतेस्वस्मिन्निमलेकः
लदेहैत्था ५५ नन्वीदृशींदशामापाद्यतिकथंत्वयानिश्चितमाहजानइति उलंकहेमेघतवसख्यामानेमापि
समंततेसहसंचिन्तानुरागंजानेअस्मात्स्वहजानकारणात् अहंप्रथमविरहेप्रथमग्रहणोऽऽस्वातिशयघोत

जानेसख्यास्तवमयिमनःसंभृतस्नेहमस्मा दित्थंभूतांप्रथमविरहेतामहंतर्कयामि वाचा
लमानखलुसुभगंमन्यःकरोतिप्रत्यक्षंतेनिखिलमचिराद्भ्रातरुक्तंमयायत् १०० ॥ ॥

नार्थंतांत्वत्सखीमित्थंभूतांपूर्वोक्तावस्थायुक्तांतर्कयामितनुसुभगमानिनोकामिनामेषःस्वभावोपदात्मनि
स्त्रीणामनुरागप्रकटनेनतआहवाचालमितिसुभगंमन्यतेइतिसुभगंमन्यःआत्ममानेखश्चेतिखशप्रत्य
यःअरुर्द्विषदित्यादिनामुमागमःमुस्वभावःसुभगंमन्यभावःसुभगंभगमानित्वंमांवाचालेबहुभाषि
णंनकरोतिनखलुसौदर्याभिमानिनेप्रकटयामिरमर्थःस्यात्जल्पाकस्तुवाचालोवाचाटोबहुगर्ह्यवा
गित्यमरः आलजाटचौबहुभाषिणीत्यालच्प्रत्ययःकिंतर्हिध्यानतःयन्मयोक्तंतदखिलंआदि ५५
त्यामामित्यादिपद्येनतन्मयैवनेःश्वितानशीघ्रमेवप्रत्यक्षंभविष्यतीतिशेषः १०० समसी॥

तस्मिन्निति हे जलद तस्मिन्काले त्वदुपसर्पणकाले सा मम प्रिया लब्धं निद्रासुखं यथा सा लब्धनिद्रासुखा स्या
द्यदि स्यात् चेत् एनां निद्राणां प्रियां मत्वान्वास्य पश्चादासित्वेत्यर्थः उपसर्गवशात्सकर्मकत्वं स्तनितवि॰
मुखो गर्जितपराङ्मुखो निःशब्दः सन् अन्यथातिनिद्राभंगादिति भावः याममात्रं प्रहरमात्रं द्वौ याम
मात्रे द्वौ यामप्रहरौ समाविन्यमरः सहस्व मेनीतस्व मार्थनायां लोट् एतयोरेकवारस्तु रतस्य यामावधिक
कत्वात्स्वप्नेपि तथा भवितव्यमित्यभिप्रायः तथाचरति सर्वस्यैकवारावधिर्भोगो रतस्य परमो मतः चेडमा॰

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्या दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व मा॰
भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथंचित् सद्यः कंठच्युतभुजलताग्रंथिगाढोपगूढम् ॥ ३ ॥

लिंमेतो प्रवोहृदयमवर्तिन्येरिति यामसहनस्य प्रयोजनमाह माभूदिति अस्याः प्रियायाः प्रणयिनि प्रेयसि
मयि कथंचित्कष्टेन स्वप्नलब्धे सति गाढोपगूढं गाढालिंगनं नपुंसके भावे क्तः कंठाच्च्युतः स्रस्तो भुजलत
योर्ग्रंथिर्बंधो यस्य तत् तथा तु कथंचिल्लब्धालिंगनस्य सद्यो विघातो माभूदित्यर्थः न चात्र निद्रोक्तिः नामस्विन्न
मिति पूर्वोक्तेन विरुध्यते समनमाघवस्यामयातिकनिद्रासंभवात् तथा रसरत्नाकरे अशक्तौ रोदनं
निद्रानिर्लज्जानर्थ्यपारम्भमः सतमादिभजायंते दशाभेदेषु वा स्तके इति ॥ २ ॥ रामाय नमः

मे.दू. नामिति तां प्रियां स्वस्य जलकणिकाभिर्जलबिन्दुभिः शीतलेनानिलेनाप्याय्य बोध्य एतेन तस्याः प्रभुत्वाद्वाला
टी. निलस्य माधुर्यं व्यज्यते यथाह भोजराजः मृदुभिः मंदैः पादैः शीतैः व्यजनैः केलनैः अनौचमत्कृतैः रैणैः निद्राधा
५२ नो वोधयेत्तत्र भामिनि आभिनवैर्मालतीनां जालकैः सम जातीकुड्मलैः सह स्वमनां मालतीजातिः सा कं
ता हेमसम सहस्तारको जालकं क्षीवकलिकाकोरकः पुमानिति चामरः समाश्वस्तां गोपाशितानिलसंपर्काम
न तु जीवितांश्च सेः कर्तरि क्तः आदितश्चेति चकारादिट्प्रतिषेधः एतेनास्याः स्वमसौकुमार्यं गम्यते त्वत्सनाथे

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनां विद्यु
द्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः १०५ ॥

त्वत्सहिते सनाथं प्रभुमप्याहुः सहिते विततापिनी इति शाश्वतः गवाक्षे स्तिमितनयनां कोसावितिविस्मयात्त्रि
श्चलनेत्रां मानिनीं जलानो चितमाखहिल्लुमिमेथः विद्युद्गर्भः अंतर्लीनविद्युत्कः इत्यर्थः
गर्भेः एवंविधेन तत्र गर्भो भ्रूणार्भ इत्यपभर्के इति शाश्वतः इहैतिनिवाने नवमेखावलोकनप्रतिबंधकत्वात्
विद्युतावियोगितत्वमिति भावः धीरोद्ध स्वमसंचलन्यास्खलन्यादिने तदनाश्वासनप्रसंगादिति भावः स्त
नितान्येव वचनानि तैर्वक्तुं प्रक्रमेथा उपक्रमस्व विध्यर्थे लिङ् प्रोपाभ्यामित्यात्मनेपदम् १०५ ॥ ५२

मं भविता इतस्य श्रोतृजनाभिमुखीकरणचातुरीमुपदिशति भर्तुरिति विधवा अन्यत्र भर्तृका न भवतीति
अविधवे सभर्तृके अनेन भर्तुर्जीवनसूचनादतिशगतशकान्तिरस्कृति मां तव पश्यः प्रियं मित्रं प्रियः
सुहृत् तदा तवापि हृदयनिहितैर्मनसि स्थापितैः तत्सन्देशात्तस्य भर्तुः सन्देशैः त्वत्समीपमागतं भर्तृस
न्देशोक्त्यर्थमागतमित्यर्थः अम्बुवाहं मेघं विद्धि जानीहि न केवलमहं वार्त्ताहरः किन्तु यद

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं तत्सन्देशैर्हृदय
निहितैरागतं त्वत्समीपं यो वृन्दानि त्वरयति पथि श्राम्यतां प्रो
षितानां मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि २५

कोपीत्याशयेनाह योऽम्बुवाहोऽबलानां स्त्रीणां वेणयस्तासां मोक्षे मोचने उत्सुकानि पथि श्राम्य
तां श्रान्तिमापन्नानां प्रोषितानां प्रवासिनां पान्थानामित्यर्थः मन्द्रैर्गम्भीरैः स्निग्धैर्मधुरैर्ध्व
निभिर्गर्जितैः वृन्दानि सार्थान्त्वरयति यो योपकारिणो मे किमु वक्तव्यं सुहृदुपकारित्वमिति

उ॰ मेघ

मे.दू.
टी.
५२

भर्तृसमर्पाद्दिशन्तापनस्य फलमाह इतीति इत्येवमाख्याते पवननतनये हनुवंते मैथिली सीतेव सा मत्प्रिया उ
न्मुखी उत्कंठेनौत्सुकेन उछ्वसितहृदया विकासितचित्ता च मती त्वां वीत्य वेष्टी त्वएसंभाव्य सत्कृत्य
सा हृदे मैत्री तापनामरसर्वश्रोतव्यमुपहिता अप्रमत्ता सती श्रोष्यति च अत्र सीता हनुमदुपसत्त्यो:
नादस्या: पातिव्रते मैत्रस्य हनुमत: संपत्तिस्त्र व्यज्यते तन्दृणा स्तु रसाकरे वस्म चारीवली धीरो मायावीम

इत्याख्याते पवननतनयं मैथिलीवोन्मुखी सा त्वामुत्कंठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवं श्रोष्य
त्यस्मात्परमवहिता सौम्य सीमंतिनीनां कांतोदंत: सुहृदुपनत: संगमात्किंचिदून: ९६

नववर्जित: धीमानुदारो निःशंको वक्ता हनुमन्त: स्त्रियो भविरितिनन्नु वार्तामात्र श्रवणाद्दस्या: कोलाभ इत्या
शोकार्थीनं रमस्पति सेष्यासार्थो सीमंतिनीनां वधूनां नारी सीमंतिनी वधूरित्यमर: सुहृदा सुहृन्मुखी
णोपनत: प्राप्त: सुहृत्सदे विप्रलंभ शंकानिरासार्थं कांते स्पोदंतो वार्ता कांतोदंत: वार्ता प्रवृत्तिर्वृत्तांत उदं
त: स्यादित्यमर: संगमत्कांतसंपर्कात् किंचिदून: ईषदून: नहदेवानेदकारीत्यर्थ: ९६ ॥ ५२

संभतिसंदिशति त्वामिति देश्यायुष्मन्नयं सा यो मत्तु परोपकारस्त्वादृशीजीवितेऽप्यर्थः ममवचने प्रार्थना॰
वचनेन तस्मादात्मनः स्वस्वेडवकर्त्तं च परोपकारेणात्मानं कृतार्थयितुं चेत्यर्थः उपकारस्त्रियामनिकर्मत्व
पितस्यान्तिकारोन्मादिवंस्सवंधमात्रविवक्षामात्मन इति षष्ठी न विरुध्यते यथाह भारविः सा लक्ष्मीरु
पकुरुते यया परेषामिति तथा श्रीहर्षः स्वसाधनामुपकर्त्तुं लक्ष्मीं द्रष्टुं विहायसा गतेन नजनः हलेकस्य मन
स्वरितिवा महात्मनो श्रोतमिति तथा च कविता द्वितीयदर्शिना तत्सर्वं वततथेति नाथव्याख्यानमसहच

नामायुष्मन्नव वचनादात्मनश्चोपकर्त्तुं ब्रूयादेवं तव सहच
रो रामगिर्याश्रमस्थः अव्यापन्नः कुशलमबले पृच्छति त्वां वियु
क्तः पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव १०२ ॥ रामः

न मे वक्तां प्रियामेवं ब्रूयादिति मितिदेश्या अबले तव सहचरो भर्त्ता रामगिरेराश्रमे श्रितः वसमाश्रमेष्विति ह
तीति रामगिर्याश्रमस्थः सन् अव्यापन्नो न मृतः वियुक्तो वियोगदुःखी एवंविधः सन् त्वां कुशलं
पृच्छति दुह्याच्यादिना पृच्छतेर्द्विकर्मकत्वं तथाहि सुलभविपदां अयत्नसिद्धविपत्तीनां प्राणिना
मेतदेव कुशलमेव पूर्वाभाष्यं प्रथमं भाष्यं कर्त्तव्यमस्मान्नव पृच्छेदर्थः १०२ रामः

मे. दू. टी. ५२

अंगेनेति किं बहुरेवतीं हरस्यः न चांगनं तु शक्यते अत आह वैरिणा विरोधिना विधिना दैवेन रुद्धमार्गः प्रति
बद्धवर्त्मा समे सहचरः तनुना कृशेन गाढतप्तेनांगेन तप्तं तप्तेनास्रेणाश्रुणा उत्कंठावेदनास्य संजाताः
उत्कंठितेन तेनोत्कंठितेन नन्दस्य संजातमित्यादिना इतच्प्रत्ययः उत्कंठचकतेरिकः समधिकतरोच्छ्वा
सिना दीर्घनिःश्वासेनेत्यर्थः ताद्दश्लेष्य कोपानिः अंगेन स्वशरीरेण तनुं कृशं तप्तेनाश्रुतेन शुष्कं ते

अंगेनांगं सततनु तनुना गाढतप्तेन तप्तं सास्रेणाश्रुद्रुतमविरतोत्कंठमुत्कंठितेन दीर्घोच्छ्वा
सं समधिकतरोच्छ्वासिना दूरवर्ती संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः १८ गम

अस्रं क्लीबेऽश्रु अस्रमस्रपुंलिंगो रोदनेप्यस्रमश्रु चेत्यर्थः श्लेषः अविरतोत्कंठम् अविच्छिन्नवेदने उ
लोच्छ्वासं तेनोच्छ्वसितं तेनितमं तीजं खरं तीक्ष्णो चेउष्णं सूक्ष्मं समेस्त तमिति हलायुधः अंगत्वे दीर्घो
नैः स्वपर्यैर्वैर्थैः संकल्पैर्मनोरथैः विशति एकीभवतीत्यर्थः अत्र सानुरागत्वयोजनितार्थेनामवे ५२
ननायकायाः स्वसमानावस्थात्वमुक्तम् १८ ॥

मेप्रतिस्वावस्थानिवेदनाय प्रस्तौति शब्दाख्येयमिति हे अबले यत्तेप्रियः सखीनां पुरस्तात् अग्रे आननस्पर्शे
नस्मुखमं पद्वैर्लोभात् शब्दाख्येयं शब्देन ख्येणाख्येयं उच्चैर्वाच्यमपि पतद्वनमपीति शेषः कर्णौ क
थयितु लोलो लालसो भकिल लोलपो लोलभो लोलो लालसो लेपटो चेति यादवः श्रवणविष

शब्दाख्येयं पदयपि किल ते यः सखीनां पुरस्तात् कर्णे लोलः क
थयितुमभूदाननस्पर्शलोभात् सोतिक्रान्तः श्रवणविषयं
लोचनाभ्यामदृश्यस्त्वामुत्कंठाविरचितपदं मन्मुखेनेवमाह १०५

यं कर्णपथमतिक्रान्तः तथा लोचनाभ्यामदृश्यः अतिदूरस्थत्वात् दृष्टुं श्रोतुं च न शक्यत इति भावः स ते
प्रियः त्वामुत्कंठया विरचितानि पदानि सुप्तिङ् तशब्दा वाक्यानि च यस्य तथोक्तं पदं शब्दं च वाक्यं चेति
विश्वः इदं वक्ष्यमाणं श्यामास्वंगमित्यादिकं मन्मुखेनाह मद्वावधाचेन स्वस एव ब्रूत इत्यर्थः १०५ ॥

सहशाश्वतिकतिरस्कमदर्शनं तदंगस्पृष्टवस्तुस्पर्शनाख्यानिवन्वाद्विविरहिणां विनोदनथा चोक्तं गुणपताकायां
विप्रयोगे वा प्रियजनसदृशानुभवनेन तच्चित्रे वा स्वप्नसमये दर्शनमपि तदंगस्पृष्टस्पर्शनं तच्च तां दर्शनमपि मतौ
कारोः तेन गच्छति मनसा कोपि गादितः इति तच्च सदृशावलुदर्शनमाह श्यामास्विति श्यामासु प्रियंगुलतासु
श्यामा तु महिलाह्वया लतानां विरहिणी गुन्द्रा प्रियंगुः फलिनी फली इत्यमरः चकोरशारीरमनुस्य श्यामि सोऽङ्ग मार्गारि
साम्यादंगमितं तव कैर्यामी समर्थः तथा च किं तरहरिणीनां प्रेतोऽहरिणीपाते शशिनि चेद्वक्त्रच्छायां मुखकांतिं तत्र या

श्यामास्वंगं चकितहरिणीप्रेक्षणे दृष्टिपातं वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशानुत्प
श्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान् हंतैकस्थं क्वचिदपि न ते चंडि सादृश्यमस्ति ११० ॥

शिखिनां बर्हिणां बर्हभारेषु पिच्छसमूहेषु केशान् प्रतनुषु तनुषु स्वल्पासु नदीवीचिषु अत्र वीचीनां विशेषणोपा
दानेपि नायुक्तगुणग्रहदोषः असाम्यनिर्वाहाय महत्वदोषनिराकरणार्थत्वात् तस्या नितांतत्तरस रत्नाकरे
ध्वनुस्यादेगुणोत्कर्षभावोक्तौ दोषवारणे विशेषणादिदोषस्य नास्ययुक्तगुणग्रहणगुणाविशेषणे
गुणग्रहणात् अविकारात् अपताकाइति पाठे भुवः पताका इवेत्युपमितसमासः उत्पश्यामीति सर्वत्र संबध्य
ते तथापि नातिशयमनीनिह्नतितिस्याशयेनाह हंतेति हंत विषादे हंत हर्षेऽनुकंपायां वाक्यारंभविषादयोरिति
स्यमरः हे चंडि कोपने चंडस्त्वत्यंतकोपनः इत्यमरः गौरादित्वात् ङीप् उपमानकथनमात्रेण न कोपितव्यमिति

धारेति हे बाले धाराभिः आसिक्तस्य स्थलस्य सुरभिवत्सुरभिणः अस्य त्वन्मुखस्य दूरीभूतं प्रतनुमपि मां पंचबाणः क्षिणो-
ति ‧ अथेतांः अस्मिन् घर्मान्ते वर्षाकाले वासराणि कथं व्रजेयुः ‧ कथंभूतानि वासराणि दिक्षु संसक्ता अत एव प्रविरला ये घना मे-
घाः ‧ तैर्व्यस्ताः तिरस्कृताः सूर्यातपा येषु तानि ।।११।। संप्रति स्वप्नेऽपि दर्शनमाह त्वामिति हे प्रिये प्रणयेन प्रेमातिशयेन कुपितां कुपि-
तावस्थायुक्तां त्वां निष्कृतिमित्यर्थः ‧ धातवो गैरिकादयः ‧ धातूनां गैरिकादीनां रागैः गैरिकादित्वगादिरंजितिया द्रवैः
तप्तवर्णामारंतेव उद्यमाणि चित्रादिरंजकद्रव्येलाक्षादौ च रागः ‧ स्यात् रूपे रंजने पुमानिति शब्दार्णवे ते ‧ धातुरागैः

धं धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले दूरीभूतं प्रतनुमपि मां पंचबाणः क्षिणोति ‧ घर्मान्तेऽस्मिन् वि-
गणय कथं वासराणि व्रजेयुर्दिक्संसक्तप्रविरलघनव्यस्तसूर्यातपानि ।।११।। त्वामालिख्य प्रणयकुपितां धा-
रा तुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामि कर्तुं अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्न-
(पिन सहते संगमं नौ कृतान्तः ।।१२।।

शिलायां शिलापट्टे आलिख्य निर्माय आत्मानं च मन्यतिकम्यमित्यर्थः ‧ तेन तवाविरु-
गतायाः इत्यर्थः ‧ चरणपतितं कर्तुं तथा लिखितुं यावदिच्छामि तावदेव अस्रैः समकालमेव मुहुरुपचितैः प्रवृद्धैः ‧
अस्रैः अश्रुभिः कर्तृभिः अश्रम अश्रुणि शोणितं इति विश्वः ‧ मे दृष्टिरालुप्यते आव्रियते इत्यर्थः ‧ ततो दृष्टिप्रतिबंधात् लेख-
नेऽप्रतिबंधनेऽभिभावः ‧ किं बहुना क्रूरो घातकः ‧ कृतान्तः ‧ कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु इत्यम-
रः ‧ तस्मिन्नपि चित्रेऽपि नौ आवयोः ‧ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ इति ‧ संगमं सहवासं न स-
हते अलेख्यसंगतिमप्यावयोरसहमानो दैवसाक्षात्संगतिं न सहते इति किमु वक्तव्यमित्यपिशब्दार्थः ।।१२।। रामः

मे.दू. टी. ५५

अधुनास्वप्नदर्शनमाह मामिति स्वप्नस्य विज्ञाने स्वप्नः स्वप्नः स्वप्नस्य विज्ञानमिति कोषात् संदर्शनं संवित् दर्श
नं स्वप्नमेव तास्ते दृष्टो स्वप्नैः त्विस्त विदीति शब्दार्णव स्वप्न इति सं दर्शनानि स्वप्नस्तानानि च तन्नहत्वादित्वात् सा
मान्यविशेषभावेन सह प्रयोगः तेषु मया कथमपि महता प्रयत्नेन लब्धायागाढीनाशाः इत्यायाश्रितयाव
त् तेन वनिहृत्वा श्लेषीणादासिगते स एव हेतुः तस्य निर्दयाश्लेषार्थमित्यर्थः षष्ठी हेतु प्रयोग इति षष्ठी
आकाशे निर्विरोध प्रणिहितभुजं प्रसारितबाहुं मां पश्यंतीनां सादात्ताकं वर्तीनां स्थली देवतानां मु

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो र्लब्धायास्ते क
थमपि मया स्वप्नसंदर्शनेषु पश्यंतीनां न खलु बहुशो न
स्थलीदेवतानां मुक्तास्थूलास्तरुकिशलयेष्वश्रुलेशाः पतंति १२

मुक्तास्थौक्तिकानीव स्थूलाः अश्रुलेशा बाष्पबिंदवः तरुकिशलयेषु अनेन चैलोक्ये नाश्रुधारण
समाधिर्ध्वन्यते बहुशो न पतंतीति न किंतु पतंत्येवेत्यर्थः निश्चयेन न द्वयप्रयोगः तथा चालंकार
सूत्रे स्वतिनिश्चय प्रसिद्धार्थेषु नन्द्वय प्रयोग इति महात्मगुरु देवताश्रुपातः त्वितो यदि देशा
भंगो महादुःखं मरणं च भवेत् ध्रुवमिति त्वितो देवताश्रुपतननिषेधदर्शनात् एतस्य मरणाभा ५५
वसूचनार्थं तरुकिशलयेषु पपतेनीत्युक्तम् ११२ ॥ रामः

इदानीं तदंगस्पृष्टवस्तुस्पर्शनमाह भित्त्वेति देवदारुद्रुमाणां किशलयपुटान् पल्लवपुटान् सद्यो भित्त्वा तत्
क्षीरस्रुतिसुरभयः तेषां देवदारुद्रुमाणां क्षीरस्रुतिभिः क्षीरनिष्यन्दैः सुरभयः सुगंधयः ये तुषाराद्रिवाताः ते
लिंगदिदृक्षयेवानादक्षिणेन दक्षिणमार्गेण प्रवर्तीया विधाते मरुतः स्यादिभ्य उपसंख्यानात्तीयाः समेन धाव
तीतिवत् तत्रापि पथः करणत्वसमानाधिकरणत्वात् करणयोरिमे वं तृतीयेति भाष्यकारः मरुताः

भित्त्वा सद्यः किशलयपुटान् देवदारुद्रुमाणां ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः आ
लिंग्यन्ते गुणमति मया ते तुषाराद्रिवाताः पूर्वं स्पृष्टं यदि किल भवेदंगमेभिस्तवेति ११५ रामः

मल्लिनाः हे गुणवति सौम्ये सौकुमार्यादिगुणसम्पन्ने ते तव तुषाराद्रिवाताः शैवप्राक्पभिः वातैः तवांगं स्पृ
ष्टं भवेद्यदि किलेति संभावितं इति बुद्ध्या स्पर्शवाती संभाव्ययोः किलेत्यमरः मया आलिंग्यन्ते आश्लि
ष्यन्ते अत्र वायूनां स्पर्शत्वेऽपि अमूर्तत्वेनालिंगनायोग्यादालिंगनइत्यभिधानं पदस्योन्मत्तप्रलपितमि
त्यदोषइति वदन्निह...कारः स्वयमेवोन्मत्तप्रलापी त्वन्ये त्वर्णीयः ११५ रामायनमः ॥

मे॰ दू॰
टी॰
५८

संक्षिप्येत इति दीर्घायामाः प्रहरसमयस्तां सा दीर्घयामा विरहवेदनया तथापि प्रतीयमानेत्यर्थः त्रियामास्त्रिः प्राय्यते योरर्द्धयोर्दिनव्यवहारात्त्रियामा इति क्षीरस्वामी कथं केन प्रकारेण संक्षिप्येते लघुक्रियेते अहरपि सर्वावस्यात्सर्वकालेष्वित्यर्थः मंदमंदो मंदप्रकारः प्रकारगुणवचनस्येति द्वि

संक्षिप्येते क्षणमिव कथं दीर्घयामा त्रियामाः सर्वावस्थास्वहरपि कथं मंदमंदातपं स्यात् इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ११५ यामः

रुक्तिः कर्मधारयवदुत्तरेष्विति कर्मधारयवदुत्तरेष्विति कर्मधारयवद्भावात्सुपोलुक् मंदमंदातपं संतापं कथं स्यात् स्यादेव हे चटुलनयने चंचलाक्षि इत्थमनेन प्रकारेण दुर्लभप्रार्थनं मत्प्राप्य मनोरथं मे मम चेतो गाढोष्माभिरतितीव्राभिस्त्वद्वियोगव्यथाभिरशरणमनाथं कृतम् ११५ ५८

नचमदीयदुर्दशाश्रवणाद्धेतव्यमित्याह नत्विति एकवाक्यंतु शब्दो भेदकः किंतु न भेदकं इत्यर्थः अथवा न
त्विति पादः नत्विति आमेत्रेणाममधारणान्तु ज्ञान्तु नयामेत्रेणाति ममरः ननु प्रियेव बहूः विगणय्यन्नु शापान्ते
ममैवेकरिष्यामीत्यावर्तेयन् आत्मानमात्मनैव मह्कस्मादिभ्य उपसंख्यानात्तृतीया अवलंबे धारयामि यथाकथं
चिजीवामीत्यर्थः ततस्तान्कारणाद्धे कल्याणि त्वभगोत्वैसाभाग्ये नेवजीवामीतिभावः बह्वादिभ्यश्चेति ङीष् त्वमपि

इत्यात्मानं बहु विगणयन्नात्मनैवावलंबे तत्कल्याणि त्वमपि सुतरां मा गमाः कातरत्वं कस्यात्यंतं सु
खमुपगतं दुःखमेकांततो वा नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ११६ ॥

नितरामत्यंतं कातरत्वं भीरुत्वं मागमाः मागमे मीति लुङ् योग इत्यडागमाभावः ताहक्कस्य विजोगवयोरीह
शी दुःखं वेकथं न बिभेमीत्याशंक्याह कस्येति कस्य जनस्यात्यंतं नियतं सुखं उपनतं प्राप्तं एकांततो नियमे
न दुःखं वा उपनतं किंतु दशाः वस्थाचक्रस्य रथांगस्य नेमिस्तद्वंतः चक्रं रथांगं तस्यांते नेमिः स्त्रीस्याद
धिः प्रमान् इत्यमरः तस्याः क्रमेण परिपाट्या क्रमः शक्तौ च परिपाट्यामिति विश्वः नीचैरधः उपरि च गच्छति
भवति तेजातो सुखदुःखप्रवर्तनेत्यर्थः ११६ ॥

मे॰ दू॰ टी॰ ५२ नवनिरवधिकमेतद्दुःखमित्याह शापांतइति शार्ङ्गःपाणौस्थितंयस्यतस्मिन् शार्ङ्गःपाणौ समस्तुपमानेस्यादि॰
नावहृतश्रीर्हरिः अहरगणार्थेभ्यः पेरनिष्कासनमोभवतइति वक्ष्यमाणशापावस्थानतरनिपातः भुजगः शेष॰
एवशायनंतस्मातउत्थितेसतिमेशापांतः शापावसानेशेषान् चतुरोमासान्मेघदर्शनप्रभृतिहरिबोधनां
तमित्यर्थः दशाद्दिवसाधिकांतत्रविवक्षितमित्युक्तमेवलोचनेमीलयित्वाचक्षुषीनिमील्यगमयदैवेण
तिवाहयेत्यर्थः पश्चादनंतरंत्वंचावांसदादीनिसर्वैर्नित्यमित्येकशेषः त्यदादीनामित्योद्देशपरंतच्छि॰

शापांतोमेभुजगशयनादुत्थितेशार्ङ्गःपाणौ शेषान्मासान्गमयचतुरोलोचनेमीलयित्वा पश्चा
दावांविरहगुणितंतंतमात्माभिलाषं निर्वेक्ष्यावःपरिणतशरच्चंद्रिकासुक्षपासु ११८॥ रामः

च्छातइत्यस्मदर्थेषः विरहेगणितमेवंकरिष्यामीतिमवस्थावर्तितंतमितिवीप्सायांद्विरुक्तिः आत्मनोराव
योरभिलाषंमनोरथंपरिणताशरच्चंद्रिकायासांतासुक्षपासुरात्रिषुनिर्वेक्ष्यावः भोक्ष्यामहेविशांते॰
लेट्निर्वेशोभृतिभोगयोरित्यमरः अत्रकेचित्प्रभोगमस्ययोरेववार्षिकत्वात्कथमाषाढादिचतुष्टयस्यवार्षि
कत्वमुक्तमितिचोदयित्वातस्यदाश्रयत्वात्परिहारोत्तरंतत्सर्वंसमंगतेअत्रगतशेषाश्चत्वारोमासाइत्युक्तेकविनात
तेनेवार्षिकाइतितस्मादनोतोयालोभनेः परिणतशरच्चंद्रिकामित्युक्तेनतत्तदेवशारन्माडभोवउक्तइत्यविरोध ५२

संभवति तस्यामेव त्वं चकल्पशंकानिरासायापातिमूढमभिधेयमपदिशति भूय इति हे प्रबले भूयः पुनरप्या
हत्वद्रतीमत्सुखेनेति शेषः मेयवचनमेतत् किमिति पुराशब्दश्चिरातीतानिस्यात्स्वधे चिरातीतनिकटा
गामिके पुरेस्यमर्थः पुरा पूर्वं शायने कंठलग्नापित्वं गलेवद्धस्य कथमन्यत्र गमनं संभवेदिति भावः नि

भूयश्चाहं त्वमपि शयने कंठलग्ना पुरा मे निद्रां गत्वा किमपि रु
दती सस्वरं विप्रबुद्धा सांतर्हासं कथितमसकृत्पृच्छतस्त्वया मे
दृष्टः स्वप्ने कितव रमयन् कामपि त्वं मयेति ११८ रामायनमः

द्रांगत्वा किमपि केनवा निमित्तेनेत्यर्थः स्वरं सशब्दं उच्चैरित्यर्थः रुदती सती विप्रबुद्धा आसीरिति शे
षः अथ यासकृत् दृष्टः पृष्टा पृच्छतो मे हे कितव त्वं कामपरमयन्मया स्वप्ने दृष्टः इति त्वया सांतर्हासं मद्दृष्टा
संयथा तथा कथितं च इति ते भर्ता भूयश्चाहेति योजना ११८

मे॰दू॰
टी॰
५८

एतस्मादिति एतस्मात्सर्वेषां कोकानां अभिज्ञावतेः नेनेत्यभिज्ञानं लक्षणं तस्य दानात् आपणात् मांकुशलिनंबु
मवेत्येति विदित्वा ज्ञात्वा हे असितनयने कुले भवं कौलीनं तस्मात्कौलीनात् लोकापवादात् एतावता कालेन परावृत्तौ
चेतस्योगकेदिति जननमवदादित्यर्थः मयि विषये अविश्वासिनी मरणाशंकिनी माभूः मा भव भवतेर्लुङ् योग
द्दुरागमप्रतिषेधः न च दीर्घेकालविप्रकर्षे सर्वस्नेहे निवृत्तिशंका कार्येत्याह स्नेहानिति किमपि किंवा निमित्तेन
विपत्तः इति शेषः स्नेहान्प्रीतिः विरहे समयन्योन्यविप्रकर्षे सति ध्वंसिनो विनश्वरान् आहुः तत्तथा न भवतीत्यभिप्रा

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा मा कौलीनादसितनयने मय्यविश्वासिनी भूः स्नेहानाहुः
किमपि विरहध्वंसिनस्ते त्वभोगादिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ११५ ॥ रामः ॥

यः किंतते स्नेहा अभोगाभावाद्धेतोः प्रसज्यप्रतिषेधेपि नञ्समासः इष्टेवस्तुनि विषेधेपि नञ्समासः इष्टेव
स्तुनि विषये उपचितरसाः संतः प्रवृद्धरसाः रसः गंधे रसः स्वादे तिक्तादौ विषरागयोरिति विश्वः प्रेमरा
शीभवंति वियोगासहिष्णुत्वदशामापद्यंते इत्यर्थः स्नेहप्रेमणोरवस्थाभेदोयं तदुक्तं आलोकनाभिलाषौ रा
गस्नेहौ ततः प्रेमा रतिः शृंगारो योगे वियोगतो विप्रलंभश्चेति एतदेव स्फुटीकृतं रत्नाकरे प्रेमत्वादिरत्नारम्भेः
प्सुतश्चित्ताभिलाषकः रागस्तु संगबुद्धिः स्यात्स्नेहस्तत्प्रवणक्रिया तद्वियोगासहं प्रेम रतिस्तत्संगवर्द्धनं शृं ५८
गारस्तत्र संयोगः समधाम्यात्तकमरः इति ११५ रामः

१स्यैवं स्वकुशलं संदिश्य प्रतनतु शलसंदेशानयनमिदानीं याचते आश्वास्येति प्रथमविरहेणोदग्रशोकां ती
व्रदुःखां ते सखीं मेवं पूर्वोक्तरीत्या आश्वास्य जीव्य त्रिनयनस्य वृषकस्य हर्षेणाहृषभेणोत्खातानि अव
दारितानि कूटानि शिखराणि यस्य तस्मात्कूटोऽस्त्री शिखरं शृंगमित्यमरः शैलात्कैलासादाशु निवृत्तः

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते शैला
दाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः साभिज्ञा
नप्रहितकुशलैस्तद्वचोभिर्ममापि प्रातः कुंदप्रस
वशिथिलं जीवितं धारयेथाः १२० रामायनमः

तः प्रत्याहृतः सन् साभिज्ञानेन सलक्षणेन यथा तथा प्रहितं प्रेषितं कुशलं येषु तैः तस्यास्तव सख्याः वचोभिर्ममा ११२
पि प्रातः कुंदप्रसवप्रभातकुंदकुसुममिव शिथिलं दुर्बलं मम जीवितमपि धारयेथाः स्थापयेः प्रार्थनायां लिङ्

मे. टी.
५८

संप्रतिमेवस्यप्रार्थनांगीकारंइत्थंसर्वकंरछति कच्चिदिति हे सौम्य साधो इदं मे बंधुकार्यं देवदत्तस्य गरु
गुलमिति वत्यया गं त्वया व्यवसितं कच्चित् करिष्यामीति निश्चितं किं कच्चित् कामप्रवेदने इत्यमरः अभि
प्रायज्ञायते कामप्रवेदनं चेति नवनेतत्सौभावदनंगीकारः शंकास्ते सप्तवो चित इत्यत आह प्रत्यादेशान्न क
रिष्यामीति प्रतिवचनात् उक्तिगर्भी प्रत्याख्यामादेशावनेवच इति शब्दार्णवे भवतो धीरतां गांभीर्यं न

कच्चित्सौम्य व्यवसितमिदं बंधुकृत्यं त्वया मे प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि निःशब्दो
पि प्रदिशसि जलं याचितश्चातकेभ्यः प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव १२१ रामः

न कल्पयामि न समर्थये खलु तद्धि कथमंगीकारस्तानेतत्राह यतो याचितः निःशब्दोपि निर्गर्जितो
पि अप्रतिज्ञातोपि त्वं प्रयत्नचातकेभ्यो जलं प्रदिशसि ददासि प्रत्युक्तं चैतदित्याह प्रतो सतां सत्पुरु
षाणां प्रणयिषु याचकेषु विषये ईप्सितार्थक्रियैव अपेक्षितार्थसंपादनमेव प्रत्युक्तं प्रतिवचनं हि क्रियाके
वलमुत्तरमित्यर्थः नीचो वदति न कुरुते न वदति साधुः करोत्येवेति भावः १२१ रामः ५८